श्रीः ॥

LIBRARY
ACADEMY OF SANSKRIT RE
MELKOTE-571 4

तैत्तरीय-

आरण्योपनि त्।

गंगाविष्णु श्रीकृष्ण दास,

मालिक-" [illegible] " स्टीम् प्रेस.

कल्याण-बंबई.

ACADEMY OF SANSKRIT RESEARCH
MELKOTE LIBRARY
Acc No
Date १९८१, शके १८९१.

M

मुद्रक और प्रकाशक–

मङ्गाविष्णु श्रीकृष्णदास

मालिक–" लक्ष्मीवेङ्कटेश्वर " स्टीम्–प्रेस, कल्याण–बंबई.

सन् १९६७ के आक्ट २५ के अनुसार रजिष्टरी सब
हक्क प्रकाशकने अपने आधीन रखा है.

ACAD
21383
6-11-97

21383
6.11.97

ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431

ACADEMY OF SANSKRIT RESEARCH
MELKOTE
LIBRARY
Acc No. 21383
Date 6.11.97

॥ श्रीः ॥

आरणेयोपनिषत् ।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ॐ शान्तिः शान्तिः शान्तिः ॥ ॥

॥ हरिः ॐ ॥ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । आपोमापामपः सर्वाः । अस्मादस्मादितो मुतः ॥ १ ॥ [illegible] सूर्यश्च । सहस्रचक्षुरहिमा । वाय्वर्थारश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनमूवरीः । पुत्रवत्वार्य मे सुत । महानाम्नी-महामानाः । महसोमहसस्वः । देवीः पर्जन्यमूवरीः । पुत्रवत्वार्य मे सुत ॥२॥ अपाꣳनुष्णिमपारक्षः । अपाꣳनुष्णिमपारघम् । अपान्नामपचावनिं । अपदेवीरितोहितं । वज्रं देवीरजीताश्च । भुवनं देवमूवरीः । आदित्यानदितिंदेवीम् । योनिनोर्ध्वमुदीषत । शिवानः शंतमाभवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मातेव्यामसंदृशि ॥ ३ ॥ अमुतः सुतौषधयो द्वे च ॥ ॥ १ ॥ स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् ।

संवत्सरविधास्यते । सूर्योमरीचिमादत्ते । सर्वस्माद्भुवनादधि । तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् । नदीव प्रभवात्काचिन् । अक्षय्यात्सम्पद्यते यथा ॥ १ ॥ तान्नद्योभिसमायन्ति । सोरुः सती न निवर्तते ॥ एवं नानासमुत्थानाः । कालाः संवत्सर* श्रिताः । अणुशश्च महशश्च । सर्वेसमवयंत्रितम् । सर्वैः सर्वैः समाविष्टः । उरुः सन्ननिवर्तते । अधिसंवत्सरं विद्यात् । तदर्वल्लक्षणे ॥ २ ॥ अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते । संवत्सरः प्रत्यक्षेण । नाधिसंत्वः प्रदृश्यते । पटरोविक्रिधः पिङ्गः । एतद्वैरूपलक्षणम् । यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते । एक * हिशिरोनानामुखे । कृत्स्नंतदुलक्षणम् ॥ ३ ॥ उभयतः सेप्तेन्द्रियाणि । जल्पितंत्वेव दिह्यते । शुक्लकृष्णं संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः । तस्यैषा भवति । शुक्रंतेअन्यद्यजतं तअन्यत् । विषुरूपे अहनीद्यौरिवासि । विश्वाहिमाया अवसि स्वधा वः । भद्रा ते पूषंनिहरातिरस्त्विति । नात्र भुवनम् । नपूषा । नपशवः । नार्तिन्यः संवत्सर एवप्रत्यक्षेण प्रियतमं विद्यात् । एतद्वैसंवत्सरस्य प्रियतम*रूपम् । योस्यमहानध*पत्न्यमानो भवति । इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ४ ॥ यथालक्षण ऋतुलक्षणं भुवन*सप्त च॥ २॥ साकं जानां*सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः । को नु मर्या आमिथितः । सखा सख्यायमत्रवीत् । जहाको अस्मदीषते । यास्तित्याजसखिविद*सख्यम् । न तस्य वाच्यपिभागो अस्ति । यदी*शृणोत्यलक*शृणोति ॥१॥ न हिप्रवेदसुकृतस्यपन्थामिति । ऋतुंऋतुनानुद्यमानः । विनंनादाभिधा वः । षष्टिश्च त्रि*शकावल्गाः। शुक्लकृष्णौ च पाष्टिकौ । सारागवस्त्रैजरदक्षः । वस-

न्नोवसुभिः सह । संवत्सरस्य सवितुः । प्रैषकृन्प्रथमः स्मृतः । अमूनादयतन्यन्यान् ॥ २ ॥ अमृ॑श्चापरिरक्षतः । एता वाचः प्रयुज्यन्ते । यत्रैतदुपदृश्यते । एतदेवविजानीयात् । प्रमाणंकालपर्यये । विशेषणं तु वक्ष्यामः । ऋतूनां॑ते निबोधत । शुक्लवासा रुद्रगणः । प्रौष्मेणावर्तते महानिजहन्पृथिवी॑सवौ॥३॥ ज्योतिषा प्रतिरव्येनसः । विश्वरूपाणि॑ वासा॑सि । आदित्यानां॑निबोधत । संवत्सरीणं कर्मफलम् । वर्षाभिर्ददता॑सह । अदुःखो दुःखचक्षुरिव । तद्यो-पात इव दृश्यते । शीतेनाव्यथयन्निव । रुरुदक्षइव दृश्यते । ह्रादयतेज्वलतश्चैव । शाम्यतश्चास्यचक्षुषी । या वै प्रजाश्र॑श्यन्ते । संवत्सरात्ताश्र॑श्यन्ते । याः प्रति॑तिष्ठन्ति । संवत्सरेताः प्रति॑तिष्ठन्ति । वर्षाभ्य इत्यथः ॥ ४ ॥ शृणो-त्यन्यांस्वर्वामेव षट्च ॥३ ॥ अक्षिदुःखोत्थितस्यैव । विप्रसंनकनीनिके । आ-ङ्कचाद्रणं नास्ति । ऋभूणां॑ तन्निबोधत । कनकाभानि॑ वासा॑सि । अहतानि निबोधत । अन्नमभीतमृज्मीत । अहंवो जीवनप्रदः । एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ १ ॥ अभिधून्वन्तोभिप्रन्तइव । वातवन्तोमरुद्गणाः । अमुतो जेतुमिपुमुग्वमिव । मन्नद्धाः सह दंदशेह । अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः । अक्रुद्धस्य योत्स्यमानस्य । क्रुद्धस्येव लोहिनी । हेमत-श्चर्षी विद्यात् । अक्ष्णयोः क्षिपणोरिव ॥ २ ॥ दुर्भिक्षं दर्वलोकेषु । मनूनामुदकं गृहे । एता वाचः प्रवदन्तीः । वैद्युता यान्ति शैशिरीः । ता अग्निः पवमाना अन्वैक्षत । इह जीविकामपरिपश्यन् । तस्यैषा भवति । इहेहवस्वत-पसः । मरुतः सूर्यत्वचः । शर्मसप्रथा आवृणे ॥ ३ ॥ दृश्यत इवावृणे ॥४॥ अतिताम्राणि॑ वासा॑सि । अष्टिर्वाज्रिशतन्निचाविश्वेदेवा विप्रहरन्ति।अग्निर्जिह्वा

असश्चत। नैव देवा न मर्त्यः। न राजा वरुणो विभुः। नाग्निर्नेन्द्रो न पवमानः। मातरिश्वा न विद्यते। दिव्यस्यैका धनुराकृतिः। पृथिव्यामपरा श्रिता॥१॥तस्येन्द्रो वह्निरूपेण। धनुर्ज्यामच्छिनत्स्वयम्। तदिन्द्रधनुरित्यज्यन्। अभ्रवर्णेषु चक्षते। एतदेव शंयोर्बार्हस्पत्यस्य। एतद्वै रुद्रस्य धनुः। रुद्रस्यैव धनुराकृतिः। शिर उत्पिपेष। स प्रवर्ग्योऽभवत्। तस्माद्यः स प्रवर्ग्येण यज्ञेन यजते। रुद्रस्य सशिरः प्रीतिं दधाति। नैनꣳरुद्र आरुको भवति। य एवं वेद॥ २॥ श्रिता यजते त्रीणि च॥ ५॥ अत्यृर्ध्वाक्षोतिरश्रान्। शिशिरः प्रदृश्यते। नैवरूपन्नैवामाꣳसि। न चक्षुः प्रतिदृश्यते। अन्योन्यं तु नहिꣳस्रतः। सतस्तद्वैवलक्षणम्। लोहितोक्षिणशारशार्ङ्गिणः। सूर्यस्योदयनं प्रति। त्वंकरोषिन्यंजलिकां त्वंकरोषि निजानुकाम्॥१॥ निजानुकानं न्यञ्जलिका। अर्मा वाचमुपासतामिति। तस्मै सर्वे ऋतवो नमन्ते। मर्यादाकरत्वात्पुरोधाम्। ब्राह्मणआप्नोति। य एवं वेद। स खलु संवत्सर एतैः सेनानीभिः सह। इन्द्राय सर्वान्कामानभिवहति। सद्रꣳसः। तस्यैषा भवति॥२॥ अवद्रꣳसोअꣳशुमतीमतिष्ठन्। इयानः कृष्णो दशभिः सहस्रैः। आवर्तमिन्द्रः शच्याधमन्तम्। उपस्तुहितं नृमणामथद्रामिति। एतयैवेन्द्रः सलावृक्यासंहे। असुरान्पारिवृञ्जति। पृथिव्यꣳशुमती। तामन्ववस्थितः संवत्सरो दिवं च। नैवंविदुषाचार्यान्तेवासिनौ। अन्योन्यस्मै दुह्याताम्। योदुह्याति। भ्रश्यतस्वर्गाल्लोकात्। इत्यृतुमण्डलानि। सूर्यमण्डलान्याख्यायिकाः। अत ऊर्ध्वꣳसंनिर्वचनाः॥ ३॥ निजानुकां भवति दुह्यातां पञ्च च॥ ६॥ आरोगोभ्राजः पटरः पतङ्गः। स्वर्णरोज्योतिषिमान्विभा-

मः । ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । कश्यपोष्टमः । स महामेरुं । न जहाति । तस्यैषा भवति । यत्तेशिल्पं कश्यपरोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्सूर्या अर्पिताः सप्तसाकम् ॥ १ ॥ तस्मिन्राजानमधिविश्रयेममिति । ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते । तान्सोमः कश्यपादधिनिर्धमति । भ्रस्ताकर्मकृदिवैवम । प्राणो जीवानीन्द्रियजीवानि । सप्तशीर्ष्ण्याः प्राणाः । सूर्याईन्याचार्याः । अपश्यमहमेनान्सप्त सूर्यानिति । पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्राक्षिः ॥ २ ॥ आनुश्राविक एवनौ कश्यप इति । उभौ वेदयिते । नहि शेकुमिव महामेरुं गन्तुम् । अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम् । गार्ग्यः प्राणत्रातः । गच्छन्तमहमेरुम् । एकं चाजहतम् । भ्राजपटरपतङ्गानिहने । तिष्ठन्नातपन्ति । तस्मादिहतप्त्रितपाः ॥ ३ ॥ अमुत्रेतरे । तस्मादिहातप्त्रितपाः । तेषामेषाभवति । सप्तसूर्यादिवमनुप्राविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् । ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । सप्तर्त्विजः सूर्याईन्याचार्याः । तेषामेषा भवति । सप्तदिशोनानासूर्याः ॥ ४ ॥ सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त । तेभिः सोमाभीरक्षण इति । तदप्याम्नायः । दिग्भ्राजऋतूंश्करोति । एतयैवावृतासहस्रसूर्यतायै इतिवैशंपायनः । तस्यैषा भवति । यद्यावं इन्द्रते शतशतं भूमीः । उत स्युः । न त्वा वाज्रिन्सहस्र * सूर्याः ॥५ ॥ अनु न जातमष्टरोदसी इति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् । अष्टौ तु व्यवसिता इति । सूर्यमण्डलान्यष्टौत ऊर्ध्वम् । तेषामेषाभवति । चित्रं देवानामुदगादनीकम् । चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवीअन्तरिक्षम् । सूर्यआत्माजगतस्तस्थुषश्चेति ॥६॥

साकं प्राश्निन्तप्रितपानानासूर्याः सूर्या नवंच ॥ ७ ॥ केदमभ्रान्निवेशते काय ४ संवत्सरो मिथः । काहः कंयं देवरात्री । कमासा ऋतवः श्रिताः । अर्धमासा मुहूर्ताः । निमेषास्त्रुटिभिः सह । कम आपो निविशन्त । यदीतो यांतिमंप्रति । काला अम्मु निविशन्ते । आपः सूर्ये समाहिताः ॥ १ ॥ अथाप्यपः प्रपद्यन्ते । विद्युल्सूर्येसमाहिता । अनवर्णेइमेभूमी । इयं चासौ च रोदसी । किं स्विदन्तराभूतम् । येनेमे विधृते उभे । विष्णुनाविधृतेभूमी । इतिवत्सस्यवेदना । इरावती धेनुमतीहिभूतम् । सूयवासिनीमनुषे दशस्यं ॥२॥ व्यष्टभाद्रोदसीविष्णवेते । दाधर्थपृथिवीमभितोमयूखैः । किंतद्विष्णोर्बलमाहुः । कादीप्तिः किंपरायणम् । एको यद्धारयदेवः । रेजंती रोदसी उभे । वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते । त्रिपदाद्धारयदेवः । यद्विष्णोरेकमुत्तमम् ॥३॥ अग्नेर्वायवश्चैव । एतदस्य परायणम् । पृच्छामित्वा परमृत्युम् । अवमं मध्यमं चैतुं । लोकंचपुण्यपापानाम् । एतत्पृच्छामिसंप्रति । अमुमादुःपरमृत्युम् । पवमानंतुमध्यम् । अग्निरेवावमोमृत्युः । चन्द्रमाश्चतुरुच्यते ॥ ४ ॥ अना भोगाः परं मृत्युम् । पापाःसंयांति सर्वदा । आभोगास्त्वेव संयन्ति । यत्र पुण्यकृतो जनाः । ततो मध्यममायन्ति । चतुर्मिश्च संप्रति । पृच्छामित्वा पापकृतः । यत्र यांतयतेयमः । त्वन्नस्तद्ब्रह्मन्प्रब्रूहि । यदिवेत्थासतोगृहान् ॥ ५ ॥ कश्यपाद्दुदिताः सूर्याः । पापान्निर्भिन्ति सर्वदा । रोदस्योरन्तर्देशेषु । तत्रन्यस्यन्तेवासवैः । ते शरीराः प्रपद्यन्ते । यथा पुण्यस्य कर्मणः । अपाप्यपादकेशासः । तत्र ते योनिजाजनाः । मृत्वापुनर्मृत्युमापद्यन्ते । अद्यमानाः स्वकर्मभिः ॥६॥ आशातिकाः क्रिमय इव । ततः पूयंतेवासवैः । अपैतं मृत्युं जयति । य एवंवेद । सखल्वेवंविद्ब्राह्मणः । दीर्घे-

श्रुत्तमोभवति । कश्यपस्यात्रेर्ऋषिःसिद्धगमनःसिद्धागमनः । तस्यैषाभवति । आयमित्सप्रवासवाः । गोहन्तिपूर्व्यारुहः ॥ ७ ॥ ऋषिर्दीर्घश्रुत्तमः । इन्द्रस्य धर्मो अतिथिरिति । कश्यपः पश्यको भवति । यत्सर्वं परिपश्यतीति सा-क्षात् । अथाग्नेरग्नष्टपुरुषस्य । तस्यैषा भवति । अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठां ते नम उक्तिं विधेमेति ॥ ८ ॥ समाहितादशस्ये उत्तममुच्यते गृहांस्वकर्मभिः पूर्व्वा-रुहति ॥ ८ ॥ अग्निश्च जातवेदाश्च । सहोजा अंजिराप्रभुः। वैश्वानरो नर्यापा ४ । पञ्चिराधाश्चसप्तमः । विश्वेषां [illegible]नाम् । एतेष्टौवसवःस्मृता इति । यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः । नीलार्चिश्च पीतकार्चिश्चेति । अथ वायोरेकादश पुरुषस्यैकादशस्त्रीकस्य । प्रभ्राजमानाव्यवदाताः ॥ १ ॥ याश्चवामुष्किवैद्युताः । रजताः पर्णषाः श्यामाः । कपिलाअतिलोहिताः । ऊर्ध्वाअवपतन्ताश्च । वैद्युतास्त्वेकादश । नैनं वैद्युतोहिनस्ति । य एवं वेद । स होवाच व्यासः पाराशर्यः। विद्युद्वधमेवाहं मृत्युमैच्छामीति । नत्वकामं हन्ति॥२॥य एवं वेद । अथ गन्धर्वगणाः। स्वानभ्राट् । अर्धारिर्भारिः। हस्तःसुहस्तः। कृशानुर्विश्वावसुः। मूर्धन्वांस्तूर्यवर्चाः। कृतीरित्येकादशगन्धर्वगणाः । देवाश्च महादेवाः । रश्मयश्च देवागरगिरः॥२॥ नैनं गरोहिनस्ति । य एवंवेद । गौरी मिमाय सलिलानितक्षती । एकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योम-न्निति । वाचो विशेषणम् । अथनिगद व्याख्याताः । तानुक्रमिष्यामः । वरा-हवस्वतपसः ॥ ४ ॥ विद्युन्महसो धूपयः । श्वापयो गृहमेधाश्चेत्येते । ये चेमे शिंशिविद्रिपः । पर्जन्याः समप्रथिवीमभिवर्षन्ति । वृष्टिभिरिति । एतयैव

विभक्तिविपरीताः। सप्तभिर्वातैरुदीरिताः। अमुलोकानभिवर्षन्ति। तेषामेषाभवति। समानमेतदुदकम्॥ ५॥ उच्चैस्त्यवचाहभिः। भूमि पर्जन्यजिन्वन्ति। दिवं जिन्वत्यग्नय इति। यदक्षरंभूतकृतं। विश्वेदेवा उपासते। महापितस्य गोप्तारम्। जमदग्निमकुर्वत। जमदग्निराप्यायते। छन्दोभिश्चतुरुत्तरैः राज्ञः सोमस्य तृप्तासः॥ ६॥ ब्रह्मणा वीर्यावता। शिवा नः प्रदिशो दिशः। तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीः स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वजिगातुभेषजम्। शन्नोअस्तुद्विपेदे। शंचतुष्पदे। सोमपा ३ असोमपा ३ इति निगदव्याख्याताः॥ ७॥ व्यवदाताहंतिगंरगिरन्तपसउदकं तृप्तासश्चतुष्पदएकंच॥ ९॥ सहस्रवृदियं भूमिः। परंव्योमसहस्रवृत्। अश्विनाभुज्यू नासत्या। विश्वस्यजगतस्पती। जाया भूमिः पतिर्व्योम। मिथुनं ता अर्तुर्यथुः। पुत्रो बृहस्पती रुद्रः। सरमाइतिस्त्रीपुमम्। शुक्रं वामन्यद्यजतंवामन्यत्। विषुरूपेअहनीद्यौरिवास्थः॥ १॥ विश्वाहिमायाअवथः स्वधावन्तौ। भद्रावां पूषणाविहरातिरस्तु। वासात्यौ चित्रौ जगतो निधानौ। द्यावाभूमीचरथःसस्सखायौ। तावश्विनावासभाश्वाहवंमे। शुभस्पती आगतस्सूर्यया सहत्युग्रोहभुज्युमश्विनोदमेधे। रायिन्न कश्चिन्ममृवांऽअवाहाः। तमूहथुर्नौभिरात्मन्वतीभिः। अंतरिक्षप्रुद्भिरपोदकाभिः॥ २॥ तिस्रः क्षप स्त्रिरहाति व्रजद्भिः। नासत्याभुज्युमूहथुः पतङ्गैः। समुद्रस्य धन्वन्नार्द्रस्यपारे। त्रिभी रथैः शतपद्भिः षडश्वैः। सवितारं वितन्वन्तम्। अनुव्रातिशावरः। आपपूरुषंवरश्चैव। सविता रेपसोभवन्। त्यं सुतृप्तंविदेत्वैव। बहुसामगिरं वशी॥ ३॥ अन्वेतितुप्रोवंक्रियान्तम्। आयसूयांत्सोमतृप्सुषु। ससंग्रामस्तनोद्योत्योतः। वाचो गाः पिपातितन्। सतद्वोभिस्तवात्येत्यन्ये। रक्षसांनन्वि-

ताश्वये । अन्वेतिपारंवृत्यास्तः । एवमेतौ स्थो अश्विना । ते एते द्यौःपृथिव्योः। अहेरहर्गर्भंदधाथे ॥ ४ ॥ तयोरेतौ वत्सावहोरात्रे । पृथिव्याअहः । दिवो रात्रिः । नाअविमृष्टौ । दंपती एव भवतः । तयोरेतौ वत्सौ । अग्निश्चादित्यश्च रात्रेवत्सः । श्वेतआदित्यः । अह्नोग्निः ॥ ५॥ ताम्रोअरुणः । ना अविमृष्टौ । दंपती एव भवतः । तयोरेतौवत्सौ । वृत्रश्चवैद्युतश्च । अग्नेर्वृत्रः । वैद्युत आदित्यस्य । ना अविमृष्टौ । दंपतीएवभवतः । तयोरेतौवत्सौ ॥ ६ ॥ उष्मा चनीहारश्च । वृत्रस्योष्मा । वैद्युतस्य नीहारः । तं तावेव प्रतिपद्यते । मय॰ रात्रीगार्भिणी पुत्रेण संवसति । तस्यावाएतदुल्बणम् । यद्रात्रौ रश्मयः । यथा गोर्गर्भिण्याउल्बणम् । एवमेतस्या उल्बणम् । प्रजयिष्णुः प्रजया च पशुभिश्च भवति । यएवंवेद । एतमुद्यन्तमापियन्तंचेति । आदित्यः पुण्यस्य वत्सः । अथर्वा त्रांगिरसः ॥७॥ स्थोपोदकाभिर्वेशीदधाथे अग्निस्तयोरेतौ वत्सौ भवति चत्व॰ रिंच ॥ १० ॥ पवित्रवन्तः परिवाजमासते । पितैषांप्रत्नो अभिरक्षतिव्रतम् । महःसमुद्रं वरुणस्तिरोदधे । धीरांइच्छेकुर्धरुणंध्वारभम् । पवित्रं ते विततं ब्रह्मणस्पते । प्रसुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते । शृतास इद्वहंतस्तमांसंशत । ब्रह्मा देवानां । असतः सद्यायतंक्षुः ॥ १ ॥ ऋषयः सप्तात्रिश्च यत् । सर्वे त्रयो अंगस्त्यश्च । नक्षत्रैः शंकृनोवसन् । अथसवितुः श्यावाश्वस्यावार्तिकामस्य । अमी य ऋक्षा निहितास उच्चा । नक्तं ददृश्रेकुहचिद्दिवेयुः । अदब्धानि वरुणस्य व्रतानि । विचाकशच्चंद्रमानक्तमेति । तत्सवितुर्वरेण्यम । भर्गोदेवस्यधीमहि ॥ २ ॥ धियो यो नःप्रचोदयात् । तत्सवितुर्वृणीमहे । वयं देवस्य भोजनम् । श्रेष्ठ॰सर्वधातमम् । तुरंभगस्यधीमहि । अपागूहत सवितातृभानं । सर्वे दिवो अन्धसः । नक्तं तान्य

भवं दृशे। अभ्यस्मना संभविष्यामः। नाम नामैव नाम मे ॥ ३ ॥ न्यु-
स्मिं पुमा-स्यास्मि। स्थावरोम्यथ जङ्गमः। यज्ञ यक्ष्ये यष्टाहं न।
मया भूतान्ययक्षत। पशवो मम भूतानि। अनुबंध्योस्म्यहं विभुः। स्त्रियः
सतीः। ता उभेपु-स आदृः। पश्यदक्षण्वान्नावेचेतदन्धः। कवियः पुत्रः
स इमाचिकेत ॥ ४ ॥ यस्ताविजानात्सवितुः पितासत्। अन्धो मणिमवि-
न्दत्। तमनङ्गुलिरावयत्। अग्रीवः प्रत्यमुंचत्। तमजिह्वाअसञ्चत। ऊर्ध्व-
मूलमवाकछाखं वृक्षं यो वेद संप्रति। न स जातुजनंश्रद्दध्यात्। मृत्युर्मामा-
रयादिति। हसि-स्रुदितं गीतम् ॥ ५ ॥ वीणापणवलासितम्। मृतं जीव
च यत्किंचित्। अङ्गानि स्रोत्र विद्धितत्। अतृप्य-स्तृप्यध्यायत्। अस्मा-
ज्जातामे मिथूचरन्। पुत्रोनिर्ऋत्या वैदेहः। अचेतायश्च चेतनः। सतंमणिम-
विन्दत्। सोनंगुलिरावयत्। सोग्रीवः प्रत्यमुञ्चत् ॥ ६ ॥ सोजिह्वो अस-
ञ्चत। नैतमृषि विदित्वा नगरं प्रविशेत्। यदि प्रविशेत्। मिथौ चरित्वा
प्रविशेत्। तत्संभवंस्यव्रतम्। आतमग्नेरथांतिष्ठ। एकाश्वमेकयोजनम्। एक-
चक्रमेकधुरम्। वातप्राजिगाति विभो। न रिष्यति न व्यथते ॥ ७ ॥ नास्याक्षो
यातुसज्जति। यच्छ्रोतांत्रोहिता-श्चाग्नेः। रथे युक्त्वाधितिष्ठति। एकया च
दशभिश्च स्वभूते। द्वाभ्यामिष्टये वि-शत्या च। तिसृभिश्च वहसे त्रि-
शता च। नियुद्भिर्वायविहतांविमुंच ॥ ८ ॥ तत्शृधीमाहिनाममेचिकेतगीतं
प्रत्यमुंचद्व्यथते सप्त च ॥ ११ ॥ आतनुष्व प्रतनुष्व। उद्भाधमसंधम। आदि-
त्ये चन्द्रवर्णानाम्। गर्भमाधेहि यः पुमान्। इतःसिक्त-स्सूर्यंगतम्। चन्द्र-
मसे रसंकृधि। वारादंजनयाग्रेऽग्निम्। य एको रुद्र उच्यते। असंख्याताः सह-
स्राणि। स्मर्यते न च दृश्यते ॥ १ ॥ एवमेतं निबोधत। आमन्द्रैरिन्द्रहरिभिः।

याहि मयूररोमभिः । मान्वाकेचिन्नयेमुरिन्नपाशिनः । दधन्त्रेत्र ना ईहि । मामन्द्रैरिन्द्रहारिभिः । यामि मयूररोमभिः । मा मा केचिन्नियेमुरिन्नपाशिनः । निधन्त्वेवता ३ ईमि । अणुभिश्च महद्भिश्च ॥२॥ निघृष्टैरसमायुतैः । कालैर्हरित्वमापन्नैः । इन्द्रायाहिसहस्रयुक् । अग्निर्वैश्वानरो वसनः । वायुश्चेतोसिकद्रुकः । संवत्सरोविषूवर्णः । नित्यास्तेनुचरास्तव । सुब्रह्मण्यो*सुब्रह्मण्यो*सुब्रह्मण्योम् इन्द्रागच्छ हरिवआगच्छ मेधातिथेः । मेषवृषणश्वम्यमने ॥ ३ ॥ गौरावस्कंदिन्नहल्यायै जार । कौशिकब्राह्मण गौतम ब्रह्मणं । अरुणाश्चा इहागताः । वर्म वः प्रथिविक्षितः । अष्टौ दिग्वासोमोऽग्रयः । अग्निश्च जातवेदाश्चेत्येते । ताम्राश्चोस्राताम्ररथाः । ताम्रवर्णास्तथामिताः । दण्डहस्ताः स्वादन्दनः । इतो रुद्राः परां गताः ॥ ४ ॥ उक्तस्थानं प्रमाणं च पुर इत । बृहस्पतिश्च सावित्रा च । विश्वरूपैरिहागताम् । रथेनाद्भकवर्त्मना । अस्मुपाइति तद्वयोः । उक्तोवपोवामासि च । कालावयवानामितः प्रतीज्या । वासात्याइन्यश्विनोः । कोन्वारिक्षेशब्दंकरोतीति । वासिष्ठौ रौहिणौ मीमांसांचक्रे । तस्यैषामर्वति । वा श्रवंविद्युदिति । ब्रह्मण उदरणमसि । ब्रह्मण उदीरणमसि । ब्रह्मण आन्तरणमसि । ब्रह्मणउपस्तरणमसि ॥ ५ ॥ दृश्यते च मने परांगताश्चकेषट्च॥१२॥ अवक्रमत गार्भिण्यः ॥ ६ ॥ अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् । अहं वेद न मे मृत्युः । न चामृत्युरघाहरन् । अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् । अहं वेद न मेमृत्युः । न चामृत्युरघाहरन् । अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममूंदिवम्॥१॥ अहं वेद न मे मृत्युः । नचामृत्युरघाहरन् । सुत्रामाणं महीमुपु । अदितिर्द्यौरदितिरन्तरिक्षम् । अदितिर्मातासपितासपुत्रः । विश्वेदेवा अदितिः पञ्चजनाः । अदितिर्जातमदितिर्जनित्वम् । अष्टौ पुत्रासो

ACADEMY RESEARCH LIBRARY

अदितेः । येजातास्तन्वः परि । देवांऽउपप्रैत्सप्तभिः ॥ २ ॥ परा मार्ताण्ड-
मास्यत् । सप्तभिः पुत्रैरदितिः । उपप्रैत्पूर्व्ययुगं । प्रजायैमृत्यवे त्वत् । परामा-
र्ताण्डमाभरदिति' । ताननुकामिप्यामः । मित्रश्चवरुणश्च । धाताचार्यमाचं । अं-
शश्चभगश्च । इन्द्रश्च विवस्वाꣳश्चेत्येते । हिरण्यगर्भोहꣳसः शुचिषत् । ब्रह्मजज्ञानं
तदित्पदमिति' । गर्भः प्राजापत्यः । अधपुरुषः सप्तपुरुषः ॥ ३ ॥ अमुं दिवं-
सप्तभिरन्ने चत्वारि' च ॥ १३ ॥ यथास्थानं गर्भिण्यः ॥ छ ॥ योसंत-
पन्नुदेति' । स सर्वेषां भूतानां प्राणानादायोदेति' । मामेप्रजाया मापशूनाम् ।
माममप्राणानादायोदगाः । असौ योऽस्तमेति' । स सर्वेषां भूतानां प्राणाना-
दायास्तमेति' । मामेप्रजायामापशूनाम् । माममप्राणानादायास्तंगाः । असौ य
आपूर्यति । स सर्वेषां भूतानां' प्राणैरापूर्यति ॥ १ ॥ मामेप्रजायामापशूनाम् ।
माममप्राणैरापूरिष्टाः । असौ योपक्षीयति । स सर्वेषां भूतानां' प्राणै
रपक्षीयति । मामेप्रजायामापशूनाम् । माममप्राणैरपक्षेष्टाः । अमूनि नक्षत्राणि ।
सर्वेषां भूतानांप्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च । मामेप्रजायामापशूनाम् ।
माममप्राणैरपप्रसृपत मोत्सृपत ॥ २ ॥ इमे मासाश्चार्द्धमासाश्च । सर्वेषां
भूतानांप्राणैरपप्रसर्पतिचोत्सर्पन्तिच । मामेप्रजायामापशूनाम् । माममप्राणैरप
प्रसृपत मोत्सृपत । इमे ऋतवः । सर्वेषां भूतानांप्राणैरपप्रसर्पन्तिचोत्सर्पन्ति
च । मामेप्रजायामापशूनाम् । माममप्राणैरपप्रसृपत मोत्सृपत । अयꣳसंव-
त्सरः । सर्वेषां भूतानांप्राणैरपप्रसर्पति चोत्सर्पति च ॥ ३ ॥ मामेप्रजा-
यामापशूनाम् । माममप्राणैरपप्रसृप मोत्सृप । इदमहः । सर्वेषां
भूतानांप्राणैरपप्रसर्पतिचोत्सर्पतिच । मामेप्रजायामापशूनां । माममप्राणैरप
प्रसृप मोत्सृप । इयꣳरात्रिः । सर्वेषां भूतानांप्राणैरपप्रसर्पति चोत्सर्पति च ।

[illegible] । मा [illegible] । ॐ भूर्भुवः स्वः । एतद्वो मिथुनं [illegible] ॥ ४ ॥ [illegible] चोन्मृष्टद्वचे ॥ १४ ॥ [illegible] नक्षत्राणीमे मासा [illegible] ॥ ८ ॥ [illegible] पुरुषस्य । [illegible] स्थाने स्वतेजसा भानि । [illegible] स्वतेजसा भानि । [illegible] । सता॰सत्यां- [illegible] । [illegible] मरुताम् । [illegible] स्थाने स्वतेजसा भानि । [illegible] स्थाने स्वतेजसा भानि । विश्वेषां देवानाम् । [illegible] स्वतेजसा भानि । संतत्मरस्य सवितुः । आदित्यस्य स्थाने स्वतेजसा भानि । ॐ भूर्भुवः स्वः । रश्मयोवो मिथुनं मानो मिथुन॰ रीड्वम् ॥ १ ॥ ऋ [illegible] स्थाने स्वतेजसा भानिषट् च ॥ १५ [illegible] स्थाने स्वतेजसाभानि । भ्राजस्य स्थाने स्वतेजसा भानि । पटरस्य स्थाने स्वतेजसा भानि । [illegible] स्वतेजसा भानि । स्वर्णरस्य स्थानेस्वतेजसाभानि । [illegible] । विभासस्यस्थाने [illegible] । [illegible] । ॐ भूर्भुवः स्वः । आपो वो मिथुन मानोमिथुन॰ रीड्वम् ॥ १ ॥ आरोगस्य दर्शा ॥ १६ [illegible] । [illegible] रुद्राणा॰ स्थाने स्वतेजसा भानि । व्यव- [illegible] स्वतेजसा भानि । [illegible] स्वतेजसाभानि [illegible] स्वतेजसा भानि [illegible] स्थाने स्वतेजसा भानि । [illegible] स्थाने स्वतेजसा भानि । कपि- [illegible] स्थाने स्वतेजसा भानि । [illegible] स्व-

तेजसाभानि । ऊर्ध्वानाꣳरुद्राणाꣳस्थानेस्वतेजसाभानि ॥ १ ॥ अवपन्तानाꣳ रुद्राणाꣳस्थाने स्वतेजसाभानि । वैद्युतानाꣳरुद्राणाꣳस्थाने स्वतेजसाभानि । प्रभ्राजमानीनाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि । व्यवदातीनाꣳरुद्राणीनाꣳ स्थानेस्वतेजसाभानि । वासुकिवैद्युतीनाꣳरुद्राणीनाꣳस्थाने स्वतेजसाभानि । रजतानाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि । परुषाणाꣳरुद्राणीनाꣳस्थाने स्वतेजसाभानि । श्यामानाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि । कपिलानाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि। अतिलोहितीनाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि। ऊर्ध्वानाꣳरुद्राणीनाꣳस्थाने स्वतेजसाभानि । अवपतन्तीनाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि । वैद्युतीनाꣳरुद्राणीनाꣳस्थानेस्वतेजसाभानि । ॐ भूर्भुवः स्वः । रूपाणिवोमिथुनंमानोमिथुनꣳरीद्ध्वम् ॥ २ ॥ ऊर्ध्वानाꣳरुद्राणाꣳस्थाने स्वेतजसा भान्यतिलोहितीनाꣳरुद्राणीनाꣳस्थाने स्वतेजसा भानि पंच च॥ १७॥ अथाग्नेरष्टपुरुषस्य । अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि । जातवेदस उपादिश्यस्यस्थाने स्वतेजसा भानि । सहोजसोदक्षिणदिश्यस्यस्थाने स्वतेजसा भानि । अजिराप्रभव उपादिश्यस्यस्थाने स्वतेजसा भानि । वैश्वानरस्यापरदिश्यस्यस्थाने स्वतेजसा भानि । नर्यापसउपादिश्यस्यस्थाने स्वतेजसा भानि । पंक्तिराधस उदक्दिश्यस्यस्थाने स्वतेजसा भानि । विसर्पिण उपादिश्यस्यस्थाने स्वतेजसा भानि । ॐभूर्भुवःस्वः । दिशोवोमिथुनं मानो मिथुनꣳरीद्ध्वम् ॥ १ ॥ स्वरेकं च ॥ १८ ॥ एतद्रश्मय आपोरूपाणि दिशःपंच । दक्षिणपूर्वस्यां दिशिविसर्पीनरकः । तस्मान्नः परिपाहि । दक्षिणापरस्यां दिश्यविसर्पीनरकः । तस्मान्नः परिपाहि । उत्तरपूर्वस्यां दिशिविषादी नरकः । तस्मान्नः परिपाहि । उत्तरापरस्यां दिश्यविषादी नरकः । तस्मान्नः परिपाहि ।

भायर्म्मित्सम्रवासवाइंद्रियाणि शतक्रतवित्येते ॥१॥ दक्षिणपूर्वेन्यान्नव ॥१९॥ इन्द्रघोषावो वसुभिः पुरस्तादुपदधताम् । मनोजवसो वः पितृभिर्दक्षिणत उपदधताम् । प्रचेता वो रुद्रैः पश्चादुपदधताम् । विश्वकर्मा व आदित्यैरुत्तर उपदधताम् । त्वष्टा वो रूपैरुपरिष्टादुपदधताम् । संज्ञानं वः पशुभिरिति । आदित्य सर्वोभिः पृथिव्याम् । वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु । नक्षत्राणि स्वलोके । एवाह्येव । एवाह्यग्ने । एवाहि वायो । एवाहीन्द्र । एवाहि पूषन । एवाहि देवाः ॥ १ ॥ दिक्षु सप्त च ॥ २० ॥ आपमापामपःमर्वीः । अस्मादस्मादितोमुतः । [illegible] । सहसंचस्करधिया । वाग्वश्वारश्मिपनयः । मरीच्यात्मानो अद्रुहः । देवीर्मुवनमूवरीः । पुत्रवत्वायमेमुत । महानाम्नीर्महामानाः । महसोमहस्वः ॥ १ ॥ देवीःपर्जन्यमूवरीः । पुत्रवत्वायमेमुत । अपाश्रुण्णिमपारधः । अपाश्रुण्णिमपारधम् । अपाग्रामपचावर्ति । अपदेवारितोहित । वज्रं देवीरजीताश्च । भुवनं देवमूवरीः । आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत ॥ २ ॥ भद्रंकर्णेभिः शृणुयामदेवाः । भद्रंपश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्तिन इन्द्रोवृद्धश्रवाः । स्वस्तिनःपूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः । स्वस्तिनोबृहस्पतिर्दधातु । कृतवोअरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठा-शतधाहि । समाहितासो सहस्रधायसम् । शिवा नः शंतमाभवंतु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योमसंदृशि ॥ ३ ॥ स्वरुदीषत वातरशनाः षट् च ॥ २१ ॥

योपां पुष्पं वेद । पुष्पवान्प्रजावान्पशुमान्भवति । चन्द्रमावाअपांपुष्पम् । पुष्पवान्प्रजावान्पशुमान्भवति । यएवंवेद । योपामायतनंवेद । आयतनवान्भ-

वति । अग्निर्वा अपामायतनम् । आयतनवान्भवति । योऽग्नेरायतनंवेद ॥ १ ॥ आयतनवान्भवति । आपोवाअग्नेरायतनम् । आयतनवान्भवति । यएवंवेद । योपामायतनंवेद । आयतनवान्भवति । वायुर्वाअपामायतनम् । आयतनवान भवति । योवायोरायतनंवेद । आयतनवान्भवति ॥ २ ॥ आपोवैवायोरायतनं । आयतनवान्भवति । यएवंवेद । योपामायतनंवेद । आयतनवान्भवति । असौवैतपन्नपामायतनम् । आयतनवान्भवति । योमुष्य तपत आयतनं वेद । आयतनवान्भवति । आपोवा अमुष्य तपत आयतनम् ॥ ३ ॥ आयतनवान्भवति । य एवं वेद । योपामायतनं वेद । आयतनवान्भवति । चन्द्रमा वा अपामायतनम् । आयतनवान्भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान्भवति । आपोवै चन्द्रमस आयतनम् । आयतनवान्भवति ॥ ४ ॥ एवं वेद । योपामायतनं वेद । आयतनवान्भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान्भवति । यो नक्षत्राणामायतनं वेद । आयतनवान्भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान्भवति । य एवं वेद ॥ ५ ॥ योऽपामायतनं वेद । आयतनवान्भवति । पर्जन्यो वा अपामायतनम् । आयतनवान्भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान्भवति । आपो वै पर्जन्यस्यायतनम् । आयतनवान्भवति । य एवं वेद । योपामायतनं वेद ॥ ६ ॥ आयतनवान्भवति । संवत्सरो वा अपामायतनम् । आयतनवान्भवति । यः संवत्सरस्यायतनं वेद । आयतनवान्भवति । आपोवैसंवत्सरस्यायतनम् । आयतनवान्भवति । य एवं वेद । योप्सु नावं प्रतिष्ठितां वेद । प्रत्येवतिष्ठति ॥ ७ ॥ इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाभ्यनूक्ता । अपाꣳरसमुदयꣳ सन् । सूर्ये शुक्रꣳसमाभृतम् । अपाꣳरसस्य यो रसः । तं वो गृह्णाम्यु-

त्तममिति' । इमे वै लोका अपाꣳ रसः ॥ तेमुष्मिन्नादित्ये समाभृताः । जानुदघ्नीमुत्तरवेदीं स्वात्वा । अपां पूरयित्वागुल्फदघ्नम् ॥ ८ ॥ पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्चꣳस्तीर्य । तस्मिन्विहायसे । अग्निं प्रणीयोपसमाधायं । ब्रह्मवादिनोवदन्ति । [illegible]णीतेयमग्निश्चीयते' । सा प्रणीतेयमप्यु ह्यं चीयते । असौ भुवनेष्यनाहिताग्निरेताः । तमभितं एता अबीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयो'ः । पशुबंधे चातुर्मास्येषु ॥ ९ ॥ अथो' आहुः । सर्वेषु यज्ञक्रतुष्विति' । एतद्धस्मवा आहुः शाण्डिलाः । कर्मग्निं चिनुते । सत्रियमाग्निं चिन्वानः । संवत्सरं प्रत्यक्षेण । कर्मग्निं चिनुते । सावित्रमग्निं चिन्वानः । अमुमादित्यं प्रत्यक्षेण । कर्मग्निं चिनुते ॥ १० ॥ नाचिकेतमग्निं चिन्वानः । प्राणान्प्रत्यक्षेण । कर्मग्निं चिनुते । चातुर्होत्रियमग्निं चिन्वानः । ब्रह्मप्रत्यक्षेण । कर्मग्निं चिनुते । वैश्वसृजमग्निं चिन्वानः । शरीरं प्रत्यक्षेण । कर्मग्निं चिनुते । उपानुवाक्यमाशुमग्निं चिन्वानः ॥ ११ ॥ इमान्लोकान्प्रत्यक्षेण । कर्मग्निं चिनुते । इममारुणकेतुकमग्निं चिन्वानइति' । य एवासौ । इतश्चामुतश्चादित्यो भाति । तमिति' । योग्नेर्मिथूयावेद । मिथुनवान्भवति । आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥१२॥ वेद भवत्यायतनं भवति । य एवं वेद वेदतिष्ठतिगुल्फदघ्नं चातुर्होत्रियमादित्यं प्रत्यक्षेण कर्मग्निं चिनुत उपानुवाक्यमाशुमग्निं चिन्वानो मिथूयाभिथुनवान्भवत्येकंच ॥ २२ ॥ पुष्पमग्निर्वायुरसौ[illegible]त्राणि पर्जन्यः संवत्सरस्तिष्ठति योनुवाकभवत्येव सत्रियꣳ संवत्सरꣳसावित्रममुंनाचिकेतं प्राणाꣳश्चातुर्होत्रियं ब्रह्मवैश्वसृजꣳशरी मुपानुवाक्यमिमांलोकानिममारुणकेतुकमग्निं चिन्वानो य एवासौ ॥ ७ ॥ आपो वाइदमासन्त्सालिलमेव ।

सप्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यांतर्मनसिकामः समवर्तत । इदꣳ सृजेयमिति । तस्माद्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाभ्यनूक्ता । कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ १ ॥ सतो बंधुमसतिनिरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति । उपैनं तदुपनमति । यत्कामो भवति । य एवं वेद । सं तपोतप्यत । सतपस्तप्त्वा । शरीरमसृजत । तस्य यन्माꣳसमासीत् । ततोरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ॥ २ ॥ ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः । यो रसः । सोपम् । अंतरतः कृमिं भूतꣳ संपन्तम् । तमब्रवीत् । मम वै त्वङ्माꣳसा । समभूत् ॥ ३ ॥ नेत्यब्रवीत् । पूर्वमेवाह मिहासमिति । तत्पुरुषस्य पुरुषत्वम् ॥ स सहस्रशीर्षापुरुषः । सहस्राक्षः सहस्रपात् । भूत्वोदतिष्ठत् । तमब्रवीत् । त्वं वै पूर्वꣳ समभूः । त्वमिदं पूर्वः कुरुष्वेति । स इन आदायापः ॥ ४ ॥ अंजलिना पुरस्तादुपादधात् । एवाह्यवेति । ततं आदित्य उदतिष्ठत् । सा प्राची दिक् । अथारुणः केतुर्दक्षिणत उपादधात् । एवाह्यग्न इति । ततो वा अग्निरुदतिष्ठत् । सा दक्षिणा दिक् । अथारुणः केतुः पश्चादुपादधात् । एवाहि वायो इति ॥ ५ ॥ ततो वायुरुदतिष्ठत् । सा प्रतीची दिक् । अथारुणः केतुरुत्तरत उपादधात् । एवा हीन्द्रेति । ततो वा इन्द्र उदतिष्ठत् । सोदीची दिक् । अथारुणः केतुर्मध्यत उपादधात् । एवाहि पूषन्निति । ततो वै पूषोदतिष्ठत् । सेयं दिक् ॥ ६ ॥ अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा इति ॥ ततोदेवमनुष्याः पितरः । गंधर्वाप्सरसश्चोदतिष्ठन् । सोर्ध्वा दिक् । या विप्रुषो विपरापतन् । ताभ्योऽसुरा रक्षाꣳसि पिशाचाश्चोदतिष्ठन् तस्मात्ते पराभवन् । विप्रुड्भ्यो हि ते

समभवन् । तदेषाभ्यनूक्ता ॥७॥ आपो ह यद्बृहतीर्गर्भमायन् । दक्षं दधाना जनयंती स्वयंभुम् । ततस्त्वष्टाभ्यमृज्यन्त सर्गाः ॥ अद्भ्यो वा इदꣳ समभूत् । तस्मादिदꣳ सर्वं ब्रह्म स्वयंभ्विति । तस्मादिदꣳ सर्वं [illegible]थिलमिवाप्लुवमिवाभवत् । [illegible]तत् । आत्मनात्मानं विधायं । तदेवानुप्राविशत् । तदेषाभ्यनूक्ता ॥ ८ ॥ विधायं लोकान्विधायं भूतानि । विधाय सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्य । आत्मनात्मानमभिसंविवेशेति । सर्वमेवेदमाप्त्वा । सर्वमवरुध्य । तदेवानुप्राविशति । य एवं वेद ॥ ९ ॥ आसीदितिष्टन्नभूदपो वायो इति सत्यं दिगभ्यनूक्ताभ्यनूक्तौ च ॥ २३ ॥ चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपाꣳरूपाणि । मेघो विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुंधे । आतर्पतिवर्ष्या गृह्णाति । ताः पुरस्तादुपदधाति । एता वै ब्रह्मवर्चस्या आपः । मुखतएव ब्रह्मवर्चसमवरुन्धे । तस्मान्मुखतो ब्रह्मवर्चसितरः ॥ १ ॥ [illegible]ति । ता दक्षिणत उपदधाति । एता वै तेजस्विनीरापः । तेज एवास्य दक्षिणतो दधाति । तस्माद्दक्षिणोऽर्धस्तेजस्वितरः । स्थावरा गृह्णाति । ताः पश्चादुपदधाति । प्रतिष्ठितावै स्थावराः । पश्चादेव प्रतितिष्ठति । वहंतीर्गृह्णाति ॥ २ ॥ ता उत्तरत उपदधाति । ओजसा वा एता वहंतीरिवोद्वहंतीरिव आकृजंतीरिव धावंतीः । ओजएवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्धं ओजस्वितरः । संभार्यागृह्णाति । तामध्य उपदधाति । इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति । पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति ॥ ३ ॥ असौ वै पल्वल्याः । अमुष्यामेव प्रतितिष्ठति । दिक्षूपदधाति । दिक्षुवाआपः । अन्नं वा आपः । अभ्यो वा अन्नं जायते । यदेवाभ्योऽन्नं जायते । तदवरुंधे । ते वा एतमरुणाः केतवो वातरशना ऋषयोऽचि-

न्वन् । तदेषाभ्यनूक्ता । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाःशतधा हि । समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च प्रति तिष्ठति । य एतमग्निं चिनुते । य उ चैनमेवं वेद ॥ ४ ॥ ब्रह्मवर्चसितरो वहंतीर्गृह्णाति ता उपरिष्टादुपादधात्यारुणकेतुकोष्टौ च ॥ २४ ॥ जानुदघ्नीमुत्तरवेदीं खात्वा । अपां पूरयति । अपाꣳ सर्वत्वाय । पुष्करपर्णेरुक्मं पुरुषमित्युपदधाति । तपो वै पुष्करवर्णम् । सत्यꣳ रुक्मः । अमृतं पुरुषः । एतावद्वावास्ति । यावदेतत् । यावदेवास्ति ॥ १ ॥ तदवरुंधे । कूर्ममुपदधाति । अपामेवमेधमवरुंधे । अथोस्वर्गस्य लोकस्य समष्टयै । आपमापामपः सर्वाः । अस्मादस्मादितो मुतः । अग्निर्वायुश्च सूर्यश्च । सहसं चस्करार्द्धया इति । वाय्वश्वारभिपतयः । लोकं पृणच्छिद्रं पृण ॥ २ ॥ यास्तिस्रः परमजाः । इंद्रघोषावो वसुभिरवाह्येवेति । पंचचितयउपदधाति । पाङ्क्तोग्निः । यावानेवाग्निः । तं चिनुते । लोकंपृणयाद्वितीयामुपदधाति । पंचपदा वै विराट् । तस्या वा इयं पादः । अंतरिक्षंपादः । द्यौः पादः । दिशः पादः । परोरजाःपादः । विराज्येवप्रति तिष्ठति । य एतमग्निं चिनुते । य उ चैनमेवंवेद ॥ ३ ॥ अस्तिपृणांतरिक्षं पादः षट्त्रि ॥ २५ ॥ अग्निं प्रणीयोपसमाधाय । तमभित एता अवीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबंधे चातुर्मास्येषु । अथोआहुः । सर्वेषु यज्ञक्रतुष्विति । अथह स्माहारुणः स्वायंभुवः । सावित्रः सर्वोग्निरित्यनुशꣳसं मन्यामहे । नानावा एतेषांवीर्याणि । कमग्निं चिनुते ॥ १ ॥ सात्रियमग्निं चिन्वानः । कमग्निं चिनुते । सावित्रमग्निं चिन्वानः । कमग्निं चिनुते । नाचिकेतमग्निं चिन्वानः । कमग्निं चिनुते । चातुर्होत्रियमग्निं चिन्वानः । कमग्निं चिनुते । वैश्वसृजमग्निं चिन्वानः । कमग्निं

चिनुते ॥ २ ॥ उपानुवाक्यमाशुमग्निं चिन्वानः । कमाग्निं चिनुते । इममारुणकेतुकमग्निं चिन्वान इति । वृषा वा अग्निः । वृषाणौ सꣳस्फालयेन् । इन्द्रेतास्य यज्ञः । तस्मान्नानुषज्यः । [illegible] क्रतुषु चिन्वीत । उत्तरवेद्याꣳ ह्यग्निश्चीयते । [illegible] चिन्वीत ॥ ३ ॥ प्राजापत्यो वा एषोऽग्निः । प्राजापत्याः प्रजाः । प्रजावान्भवति । य एवंवेद । पशुकामश्चिन्वीत । संज्ञानं वा एतत्पशूनाम् । यदाप्यः । पशूनामेव संज्ञानेऽग्निं चिनुते । पशुमान्भवति । य एवंवेद ॥ ४ ॥ वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः । पर्जन्यो वर्षुको भवति । य एवं वेद । आमयावी चिन्वीत । आपो वै भेषजम् । भेषजमेवास्मै करोति । सर्वमायुरेति । अभिचरꣳश्चिन्वीत । वज्रो वा आपः ॥ ५ ॥ वज्रमेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत एनम् । तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामस्वर्गकामश्चिन्वीत । एतावद्वावास्ति । यावदेतत् । यावदेवास्ति । तदवरुन्धे । तस्यैतद्व्रतम् । वर्षति न धावेत् ॥ ६ ॥ अमृतं वा आपः । अमृतस्यानंतरित्यै । नाप्सु मूत्रपुरीषं कुर्यात् । न निष्ठीवेत् । न विवसनः स्नायात् । गुह्यो वा एषोऽग्निः । एतस्याग्नेरनंतिदाहाय । न पुष्करपर्णानि हिरण्यं वाधितिष्ठेत् । एतस्याग्नेरनभ्यारोहाय । नकूर्मस्याभीयात् । नोदकस्याघातुकान्येनमोदकानि भवंति । अघातुका आपः । य एतमग्निं चिनुते । य उ चैनमेववेद ॥ ७ ॥ चिनुते चिनुते प्रजाकामश्चिन्वीत य एवं वेदापो धावेदभीयात्चत्वारिंच ॥ २६ ॥ इमानुकं सुवनासीषधेम। इन्द्रश्च विश्वेच देवाः । यज्ञं च नस्तन्वंच प्रजां च । आदित्यैरिन्द्रः सहसीषधातुः । आदित्यैरिन्द्रः सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् । आप्त्वस्व प्रभूवस्व । आंडीमवजमामुहुःसुखादीन्दुःखनिधनाम् । प्रतिमुंचस्व स्वांपुरम् ॥१॥

मरीचयः स्वायंभुवाः । ये शरीराण्यकल्पयन् । ते ते देहं कल्पयन्तु । मा चते स्यासमतीरिषन् । उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः । राज्ञः सोमस्य तृप्तासः । सूर्येण सयुजोषसः । युवा सुवासाः । अष्टचक्रा नवद्वारा ॥ २ ॥ देवानां पूरयोध्या । तस्याꣳ हिरण्मयः कोशः । स्वर्गो लोको ज्योतिषा वृतः । योवैतां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः । विभ्राजमानाꣳ हरिणीम् । यशसा संपरीवृताम् । पुरꣳ हिरण्मयीं ब्रह्मा ॥ ३ ॥ विवेशापराजिता । पराङ्त्र्यं ज्यामयी । पराङ्त्र्यं नाशकी । इह चामुत्र चान्वेति । विद्वांदेवासुरानुभयान् । यत्कुमारी मंद्रयते । यद्योषित्पतिव्रता । अरिष्टं यत्किंचक्रियते । अग्निस्तदनुवेधति । अश्रुतासः श्रुतासश्च ॥ ४ ॥ यज्वानो येप्ययज्वनः । स्वयंतोनापेक्षन्ते । इन्द्रमग्निं च ये विदुः । सिकता इव संयन्ति । रश्मिभिः समुदीरिताः । अस्माल्लोकादमुष्माच्च । ऋषिभिरदात्पृश्निभिः । अपेतवीतिवीचसर्पतातः । यत्रस्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ५ ॥ यमोददात्वसानमस्मै । नृमुणं तु नृपात्वर्यः । अकृष्टाये च कृष्टजाः । कुमारीषु कनीनीषु । जारिणीषु च ये हिताः । रेतःपीता आण्डपीताः । अङ्गारेषु च ये हुताः ॥ उभयान्पुत्रपौत्रकान् । युवेहं यमराजगान् । शतमिन्नु शरदः । अदो यद्ब्रह्म विलवम् । पितृणां च यमस्य च । वरुणस्याश्विनोरग्नेः । मरुतां च विहायसाम् । कामप्रयवणं मे अस्तु । सह्येवास्मि सनातनः । इति नाको ब्रह्मिश्रवोगायोधनम् । पुत्रानापो देवीरिहाहिता ॥ ६ ॥ पुरन्नवद्वारा ब्रह्माचव्यक्तꣳशरदोष्टौच ॥ २७ ॥ विशीर्ष्णी गृध्रशीर्ष्णी च । अपेतोनिर्ऋतिꣳ हथः । परिवाधꣳ श्वेतकुक्षम् । निजङ्घꣳशबलोदरम् । सतान्वाच्यायया सह । अग्ने नाशय संदृशः ।

ईर्ष्यामूयेषुमुक्षाम। मन्युं कृत्यां च दीधिरे। रथेन किंशुकावता। अग्ने नाशाय संदृशः॥ १॥ २८॥ पर्जन्याय प्रगायत। दिवस्पुत्राय मीळुषे। स नो यवसमिच्छतु। इदं वचः पर्जन्याय स्वराजे। हृदो अस्त्वन्तरंतर्युवान। मयोभूर्वातो विश्वकृष्टयः संत्वस्मे। सुपिप्पला ओषधीर्देवगोपाः। योगभेमोषधीनाम्। गवां कृण्मात्यर्वताम्। पर्जन्यः पुरुषाणाम्॥ १॥ विशीर्णां पर्जन्याय दशदश॥ २९॥ पुनर्मामैत्विन्द्रियम्। पुनरायुः पुनर्भगः। पुनर्ब्राह्मणमैतु मा। पुनर्द्रविणमै तु मा। यन्मेद्य रेतः पृथिवीमस्कान्। यदोषधीरप्यसरद्दार्पः। इदं तत्पुनरादेदे। दीर्घायुत्वाय वर्चसे। यन्मेरेतः प्रासिच्यते। यन्म आजायते पुनः। तेन माममृतं कुरु। तेन सुप्रजसं कुरु॥ १॥ पुनर्ब्रह्म॥ ३०॥ अभ्यस्तिरोधा जायत। तव वैश्रवणः सदा। तिरोधेहि सपत्नानः। य अपोभंति केचन। त्वाष्ट्रीं मायां वैश्रवणः। रथं सहस्रबन्धुरम्। पुरुश्चक्रं सहस्राश्वम। आस्थायाहिनो बलिं। यस्मै भूतानिबलिमावहन्ति। धनंगावोहस्तिहिरण्यमश्वान्॥ १॥ असामसुमतौयज्ञियस्य। श्रियं विभ्रतोऽमुष्मीविराजम्। सुदर्शनेचं कौबेरं च। मैनागे नगिरौ। सतद्वाट्टारंगमंता। स हार्य नगरं तव। इतिमंत्राः। कल्पोतऊर्ध्वम्। यदि बलिं हरेत्। हिरण्यनाभेयेवितुदवं फौबेरायायं बलिः॥ २॥ सर्वभूताधिपतये नम इति। अथ बलिं हृत्वोपतिष्ठेत। क्षत्रंक्षत्रंवैश्रवणः। ब्राह्मणा वयं स्मः। नमस्ते अस्तु मामाहिंसीः। अस्मात्प्रविश्यान्नमद्धीति। अथ तमग्निमादधीत। यस्मिन्नेतत्कर्मप्रयुंजीत। तिरोधाभूः। तिरोधाभुवः॥ ३॥ तिरोधास्वः। तिरोधाभूर्भुवःस्वः। सर्वेषां लोकानामाधिपत्य सीदेति। अथ तमग्निमिन्धीत। यस्मिन्नेतत्कर्म प्रयुञ्जीत। तिरोधाभूः स्वाहा। तिरोधाभुवः स्वाहा। तिरोधास्वः स्वाहा। तिरो-

धाभूर्भुवः स्वः स्वाहा । यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः ॥ ४ ॥ अपि ब्राह्मणदुर्दिनाः । तस्मिन्नह्नः काले प्रयुंजीत । परः सुप्तजनाद्वेपि । मात्म-प्रमाद्यंतमाध्यापयेत् । सर्वार्थाः सिध्यंते । य एवं वेद । क्षुध्यन्निदमजानताम् । सर्वार्था न सिध्यंते । यस्ते विधातुको भ्राता । ममांतर्हृदयेश्रितः ॥ ५ ॥ तस्मा इममग्रपिण्डं जुहोमि । समेर्थान्माविवधीत् । मायि स्वाहा । राजाधि-राजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । समे कामान्कामका-माय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳशतधाहि । समा-हितासो सहस्रधायसम् । शिवानः शंतमाभवंतु । दिव्या आपओषधयः । सुमृ-डीका सरस्वति । मातेव्योमसंदृशि ॥ ६ ॥ अश्वान्बालिर्भुवो भवेयुः श्रितश्च सप्तच ॥ ३१ ॥ संवत्सरमेतद्व्रतं चरेत् । द्वौ वा मासौ । नियमः समासेन । तस्मिन्नियमविशेषाः । त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तःस्यात् । अहरहर्वा भैक्षमश्नीयात् । औदुंबरीभिः समिद्भिराग्निं परिचरेत् । पुनर्मा-मैत्विंद्रियमित्येतेनानुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वीत ॥ १ ॥ असंचयवान । अग्नये वायवे सूर्याय । ब्रह्मणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः । ऋतुभ्यः संवत्सराय । वरुणायारुणायेति व्रतहोमाः । प्रवर्ग्यवदादेशः । अरुणाः काण्डऋषयः । अरण्येधीयीरन् । भद्रंकर्णेभिरिति द्वे जपित्वा ॥ २ ॥ महानाम्नीभिरुदकꣳसꣳस्पर्श्य । तमाचार्यो दद्यात् । शिवानः शंतमेत्योषधीरा-लभते । सुमृडीकेतिभूमिं । एवमेपवर्गे । धेनुर्दक्षिणा । कꣳसंवासश्च क्षौमम् । अन्यद्वा शुक्लं । यथाशक्तिवा । एवꣳस्वाध्यायधर्मेण । अरण्येऽधीयीत । तप-स्वीपुण्यो भवति तपस्वीपुण्यो भवति ॥ ३ ॥ कुर्वीत जपित्वा स्वाध्यायꣳ-

धर्मेण द्वे च ॥ ३२ ॥ भद्रꣳस्मृतिꣳ साकं जानामक्ष्यतिꣳ ताम्राण्यन्यूध्वाश्च-
आरोगः केदमग्निश्च सहस्रवृत्त्यवित्रवन्त आतनुष्वाष्टयोनीयोसावथादित्यस्या-
रोगस्त्वाथवा योरथाग्रेदक्षिणपूर्वस्यामिंद्रघोषावआर्षमापां । योपामापो वैचतु-
ष्टय्यो जह्नुर्दक्षिणाꣳ प्रणीयमानुकं विशीर्ष्णी पर्जन्याय पुनरभ्यः संवत्सरं
द्वात्रिꣳशत् ॥ ३२ ॥ भद्रं ज्योतिषा तस्मिन्नाजानं कश्यपोत्सहस्रवृदियं न
पुꣳसमष्टयोनीं दक्षिणपूर्वस्यां योपामायतनंनेत्यब्रवीजानुदन्नीमिमानुकमसाम
सुमनावष्टावि ꣳशत्युत्तरशतम् ॥१२८॥ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिः । व्यशेमदेव हितं यदा-
युः । स्वस्तिन इंद्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो
अरिष्टनेमिः । स्वस्तिनोबृहस्पतिर्दधातु । ॐ शांतिः शांतिःशांतिः । हरिः ॐ॥

इति तैत्तरीयशाखायाम् आरण्यके प्रथमप्रश्नः समाप्तः ॥

हरिः ॐ । नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि । ॐ शांतिः शांतिः
शांतिः ॥ ॐ सह वै देवानां चासुराणां च यज्ञो प्रतेतावास्तांवयꣳ स्वर्गलोकमे-
ष्यामो वयमेष्याम इति ते सुराः सन्नह्य सहसैवाचरन् ब्रह्मचर्येण तपसैव
देवास्तेसुरा अमुह्यꣳस्तेन प्राजानꣳस्तेपराभवꣳस्तेन स्वर्गं लोकमायन्प्रसृतेन वै
यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसृतेनासुरान्पराभावयन्प्रसृताह वै यज्ञोपवीतिनो
यज्ञोप्रसृतोनुपवीतिनो यत्किंच ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्त-
स्माद्यज्ञोपवीत्यधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा
दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेवधत्ते सव्यामिति यज्ञोपवीतमेतदेव
विपरीतं प्राचीनावीतꣳसवीतं मानुषम् ॥१॥ रक्षाꣳसि हवा पुरानुवाक तपोम-

मतिष्ठंत तान्प्रजापतिर्वरेणोपामंत्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान्प्रजापतिरब्रवीद्योधयध्वमिति तस्मादुत्तिष्ठंतꣳ हवा तानि रक्षाꣳस्यादित्यं योधयंति यावदस्तमन्वगात्तानि हवा एतानि रक्षाꣳसि गायत्रियाभिमंत्रितेनांभसा शाम्यन्ति तदु हवा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्रियाभिमंत्रिता आपऊर्ध्वं विक्षिपंति ता एता आपो वज्री भूत्वा तानि रक्षाꣳसि मंदेहारुणे द्वीपे प्रक्षिपंति यत्प्रदक्षिणं प्रक्रमंति तेन पाप्मानमवधूनंत्युद्यंतमस्तंयन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्त्सकलं भद्रमश्नुते सावादित्योब्रह्मेति ब्रह्मैवसन्ब्रह्माप्येतियएवंवेद ॥२॥ यद्देवा देवहेलनं देवासꣳश्चकृमावयम् । आदित्यास्तस्मान्ममुंचतर्तस्यर्ते नमामित । देवाजीवनकाम्या यद्वाचानृतमूदिम । तस्मान्न इह मुंचत विश्वेदेवाः । सजोषसः । ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति । कृतं नः पाह्येनसोयत्किंचानृतमूदिम । इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः । तेनो मुंचंत्वेनसो यदन्यकृतमारिम । संजातशꣳसादुतजामिशꣳसा ज्यायसःशꣳसादुतवाकनीयसः । अनाधृष्टं देवकृतं यदेनस्तस्मात्त्वमस्मां जातवेदोमुमुग्धि ॥ १ ॥ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवभ्याꣳ शिश्नैर्यदनृतं चकृमा वयम् । अग्निर्मातस्मादेनसः प्रमुंचतु चकृम यानि दुष्कृता । येनत्रितो अर्णवान्निर्बभूवयेन सूर्यं तमसोनिर्मुमोच । येनेन्द्रोविश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आक्षि । यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि । एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रतितत्ते दधामि । यन्मयि माता यदापिपेषयदंतरिक्षं यदाशसाति कामामि त्रितेदेवादिविजातायदाप इमं मेवरुण तत्त्वायामि त्वन्नो अग्नेसत्वन्नोअग्ने त्वमग्ने अयासि ॥ २ ॥ मुमुग्धिसप्तच ॥ ३ ॥ यदहीव्यं

नृणमहं बभ्रूवादित्सन्वासंजगरजनेभ्यः । अग्निर्मोतस्मादंहश्चन्द्रं सांवेदानौ प्रमुंचताम् । यद्वस्ताभ्यां चकरकिल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमानः । उप्रं पश्याचराष्ट्रभृच्चतान्यप्सरसावनुदत्तामृणानि । उप्रं पश्येयं राष्ट्रभृतिकिल्बिषाणि यदक्षवृत्तमनुदत्तमेतत् । तेन्नऋणानृणव इत्समानो यमस्य लोके अधिरज्जुरार्य । अवंतेहेल उदुत्तमामिमं मे वरुण तस्त्वायामि त्वन्नो अग्ने सत्वन्नो अग्ने । संकुसुको विकुसुको निर्ऋथोयश्चनिस्वन. । ते १ यस्मयक्ष्ममनांगसो दूराद्दूरमचीचतम् । निर्यक्ष्ममचीचनेकृत्यां निर्ऋतिं च । तेन यो २ स्मत्समृच्छातैतमस्मै प्रसुवामसि । दुःशस्सानुशस्साभ्यां घणेनानुघणेन च । तेनान्यो २ स्मत्समृच्छातैतमस्मै प्रसुवामसि । संवर्चसा पयसा संतनूभिरगन्महिमनसाशिवेन । त्वष्टानो अत्र विदधातु रायोनुमार्ष्टुतन्वा २ यद्विलिष्टम् ॥ १ ॥ निर्ऋतिं पंच च ॥ ४ ॥ आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः । पुनस्ते प्राण आयाति परायक्ष्मस्सुवामिते । आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारुगव्यं पितेव पुत्रमभिरक्षतादिमम् । इममग्न आयुषे वर्चसे कृधि तिग्मंमोजो वरुण सशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत् । अग्न आयूंषि पवस आसुवोर्जमिषं चनः । आरे बाधस्व दुछुनाम् । अग्ने पवस्व स्वपा अस्मे वर्चःसुवीर्यम् । दधद्रयिं मयिपोषम् ॥ १ ॥ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे महागयम् । अग्ने जातान्प्रणुदानः सपत्नान्प्रत्यजातां जातवेदो नुदस्व । अस्मे दीदिहि सुमना अहेळंछंर्म ते स्यामत्रिवरूथ उद्भौ । सहसा जातान्प्रणुदानः सपत्नान्प्रत्यजातां जातवेदो नुदस्व । अधिनो ब्रूहि सुमनस्यमानो वयंस्याम प्रणुदानः सपत्नान् । अग्ने योनोभितो

जनोवृको वारो जिघाꣳसति । ताꣳस्त्वंवृत्रहं जहि वस्वस्मभ्यमाभर । अग्ने योनाभिदासतिसमानो यश्च निष्टयः । तं वयꣳसमिधं कृत्वा तुभ्यमग्ने पि दध्मसि ॥ २ ॥ यो नः शपादशपतो यश्च नः शपतः शपात् । उषाश्च तस्मै निष्क्रुच सर्वपापꣳसमूहताम् । योनः सपत्नो योरणो मर्ताभिदासतिदेवाः । इध्मस्येव प्रक्षायतो मदस्येषोऽभिदासति । यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम् । सर्वाꣳस्तानग्ने संदह याꣳश्चाहं द्वेष्मि ये च माम् । यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निंदाद्यो अस्मांदिप्साच्च सर्वाꣳस्तन्भष्मषा कुरु । सꣳशितं मे ब्रह्मसꣳशितं वीर्यं २ बलम् । सꣳशितं क्षत्रंमे जिष्णुयस्याहमस्मि पुरोहितः । उदेषां बाहू अतिरमुद्वर्चोअथो बलम् । क्षिणोमि ब्रह्मणा मित्रानुन्नयामि स्वां २ अहम् । पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनःश्रोत्रं म आगात्पुनः प्राणः पुनराकूतं म आगात्पुनश्चित्तं पुनराधीतं म आगात् । वैश्वानरो मेदब्धस्तनूपा अवबाधतां दुरितानि विश्वा॥३॥ रयिं मयि पोषं पिदध्मासि पुरोहितश्चत्वारि च ॥५॥ वैश्वानराय प्रतिवेदयामो यदीनृणꣳसंगरो देवतासु । सएतान्पाशान्प्रमुचन्प्रवेदसनौ मुंचातुदुरितादवद्यात् । वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधावाम्याशाम् । अनाजानन्मनसा याचमानो यदत्रैनो अवतत्सुवामि । अमी ये सुभगे दिवि विचृतौ नाम तारके । प्रेहामृतस्य यच्छतामेतद्वृद्धकमोचनम् । विजिहीर्ष्वलोकान्कृधि बंधान्मुंचासि बद्धकम् । योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुप्व । सप्रजानन्प्रतिगृभ्णीन विद्वान्प्रजापतिः प्रथमजा ऋतस्य । अस्माभिर्दत्तं जरसः परस्तात्पितृषु । तंतुमनुसंचरेम ॥ १ ॥ ततं तंतुमन्वेके अनुसंचरंति येषां दत्तं पित्र्यमायनम् । अबंध्वेके ददतः प्रयच्छाद्वातुंचेच्छक्त्वाꣳसस्वर्गं एषाम् । आर-

भेथा मनुस॰रेमेथा॰समानं पन्थामवथो घृतेन । यद्वां पूतं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापतीस॰रेमेथाम् । यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिं॰सिम । अग्निर्मातस्मादेनसो गार्हपत्य उन्नो नेषदुरिता यानि चकृम । भूमिर्मातादितिर्नोजनित्रं भ्रातान्तरिक्षमभिशस्त एनः । द्यौर्नः पिता पितृयाच्छंभवासि जामिमित्वा माविवित्सिलोकान् । यत्र सुहार्दः सुकृतो मदंति विहाय रोगं तन्वा २ ॰स्वायाम् । अश्लोणांगैरहृणास्वर्गे तत्र पश्येम पितरं च पुत्रम् । यदन्नमक्रयनृतेन देवादास्यन्नदास्यन्नुतवा कारिष्यन् । यदेवानां चक्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु । यदन्नमद्मि बहुधाविरूपं वासो हिरण्यमुतगामजामविम् । यदेवानां चक्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु । यन्मया मनसा वाचा कृतमेनः कदाचन । सर्वस्मात्तस्मान्मेळिता मोग्धि त्वं॰हि वेत्थ यथातथम् ॥ २ ॥ अनुसंचरेम पितरं च पुत्रं॰षट् च ॥ ६ ॥ वातरशना ह वा ऋष्यः श्रमणा ऊर्ध्वमंथिनो बभूवुस्तानृषयोर्थमायं॰स्तेनिलायमचरं॰ स्तेनुप्रविशुः कूष्मांडानि तार॰स्तेष्वन्वविंदञ्छ्रद्धयाचतपसा च त ह ऊचुः कानिलायं चरथेति त ऋषीनब्रुवन्नमोवोस्तु भगवंतोस्मिन धाम्नि केन वः सपर्यामेति तानृषयो ब्रुवन्पवित्रं नो ब्रूत येनारेपसस्यामेति न एतानि सूक्तान्यपश्यन्यद्देवादेवहेळनं यदृदीव्यं नृणमहं बभूवायुष्टे विश्वतो दधदित्येतैराज्यं जुहुत वैश्वानराय प्रतिवेदयाम इत्युपातिष्ठत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष्यध्व इति त एतैरजुहवुस्तेरेपसोभवन्कर्मादिप्वेतैर्जुहुयात्पूतो देवलोकान्समश्नुते ॥ ७ ॥ कूष्मांडैर्जुहुयाद्योपूत इव मन्येत यथा स्तेनो यथाभ्रूणहैवमेष भवति । यो योनौ रेतः सिंचति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते याव-

देनो दीक्षामुपैति दीक्षित एतैः संतति जुहोति संवत्सरं दीक्षितो भवति संवत्सरादेवात्मानं पुनीते मासं दीक्षितो भवति यो मासः स संवत्सरः संवत्सरादेवात्मानं पुनीते चतुर्विꣳशतिꣳरात्रीर्दीक्षितो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरादेवात्मानं पुनीते द्वादशरात्रीर्दीक्षितो भवति द्वादश मासाः संवत्सरः संवत्सरादेवात्मानं पुनीते षड्रात्रीर्दीक्षितो भवति षड् वा ऋतवः संवत्सरः संवत्सरादेवात्मानं पुनीते तिस्रोरात्रीर्दीक्षितो भवति त्रिपदा गायत्री गायत्रिया एवात्मानं पुनीते न माꣳसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात्पयोव्राह्मणस्य व्रतं यवागूराजन्यस्यामिक्षा वैश्यस्याथो सौम्येष्वध्वर एतद्व्रतंब्रूयादादिमन्ये तोपदस्यामीत्योदनं धानाः सक्तून्घृतमित्यनुव्रतयेदात्मानोनुपदासाय ॥ ८ ॥ अजानन्हवै पशवोस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋषयो भवंतदृषीणामृषित्वं तां देवतामुपातिष्ठंत यज्ञकामास्त एतं ब्रह्म यज्ञमपश्यंतमाहरं तेनायजंत यदृचोध्यगीष्त ताः पयं आहुतयो देवानामभवन्यद्यजूꣳषि घृताहुतयो यत्सामानि सोमाहुतयो यदथर्वाङ्गिरसो मध्वाहुतयो यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथानाराशꣳसीर्मेदाहुतयो देवानामभवꣳस्ताभिः क्षुधं पाप्मानमपाघ्नन्नपहतपाप्मानो देवाः स्वर्गलोकमायन्ब्रह्मणः सायुज्यमृषयोगच्छन् ॥ ९ ॥ पंच वा एते महायज्ञाः संतति प्रतायंते मतति संतिष्ठंते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः संतिष्ठते यत्पितृभ्यः स्वधाकरोत्यप्यपस्तत्पितृयज्ञः संतिष्ठते यद्भूतेभ्यो बलिꣳहरति तद्भूतयज्ञः संतिष्ठते यद्ब्राह्मणेभ्योन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते यदृचोधीते पयसः कूल्या अस्य

[illegible] यजूंषि घृतस्य कुल्या [illegible] सोमं एभ्यः पवते [illegible] मधोः कुल्या [illegible] कल्पान्ताधा नाग [illegible] कन्यां अन्य [illegible] परे [illegible] यजूंषि [illegible] सामानि [illegible] कल्पान्तार्था नागश्च [illegible] तदेतन्न [illegible] नृपा आयुषा तेजसा वर्चस श्रिया यशसा [illegible] च तर्पयति ॥ १० ॥ ब्रह्मयज्ञेन [illegible] प्राच्यां दिशि [illegible] उदीच्यां [illegible] वादित्ये आदित्ये दक्षिणत [illegible] परिमृज्य स्फुर्दुपस्पृश्य [illegible] नासिके श्रोत्रे [illegible] तेन ऋचः प्रीणाति यद्वि [illegible] तेन यजूंषि [illegible] तेन सामानि यत्सव्य पाणि पादौ प्रोक्षति [illegible] नासिके श्रोत्रे [illegible] तेनाथर्वाङ्गिरसो [illegible] नराशंसीः प्रीणाति दर्भाणां [illegible] कृत्वा [illegible] वा एष आर्षधीनारसो यद्दर्भाः सर्वमेव ब्रह्म कुरुते दक्षिणोत्तरौ [illegible] कृत्वा सप्र [illegible] प्रतिपद्यत एतद्वै यजुष्मत्यो विद्यां प्रत्येषा [illegible] तदेतद्ब्रह्म [illegible] अक्षरे परमे [illegible] अधिविद्य [illegible] किमृचा करिष्यति य इत्तद्विदुस इमे समासत इति त्रीनेव प्रायुंक्त भूर्भुवः [illegible] वाचः सत्यं यदेव वाचः सत्यं [illegible] सावित्रीं गायत्रीं [illegible] धर्चेशो [illegible] सविता [illegible] प्रज्ञातयैव [illegible] प्रतिपद्यते ॥ ११ ॥ ग्रामे मनसा [illegible]

दिवानक्तं वेति ह स्माह शौच आह्वेय उतारण्येऽबले उत वाचोत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति य एवं विद्वान्त्स्वाध्यायमधीते नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ १२॥ मध्यन्दिने प्रबलमधीयीतासौ खलु वा वैष आदित्यो यद्ब्राह्मणस्तस्मात्तर्हि तेदक्षिणं तपति तदेषाभ्युक्ता ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावापृथिवी अंतरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्चेति स वा एष यज्ञः सद्यः प्रतायते सद्यः संतिष्ठते तस्य प्राक्सायमवभृथो नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहाप उपस्पृश्य गृहानेति ततो यत्किंच ददाति सा दक्षिणा ॥ १३ ॥ तस्य वा एतस्य यज्ञस्य मेघाहविर्धानं विद्युदग्निर्वर्षꣳहविरर्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या स्विष्टकृद्य एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पर्यमाने वा यावन्मावास्यायाꣳस्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इत्युत्तमं वाक्रोदित्युत्तमः समानानां भवति यावंतꣳह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयाꣳसं चाक्षय्यं चाप पुनर्मृत्युं जयति ब्रह्मणः सायुज्यं गच्छति॥१४॥ तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माशुचिर्यदेशः समृद्धिर्दैवतानि य एवं विद्वान्महारात्र उपस्युदिते व्रजꣳस्तिष्ठन्नासीनः शयानोरण्ये ग्रामे वा यावत्तरꣳस्वाध्यायमधीते सर्वांल्लोकान्जयति सर्वा लोकाननृणोतुमंचरति तदेषाभ्युक्ता ॥ अनृणा अस्मिन्ननृणाः परस्मिꣳस्तृतीये लोके अनृणाः स्याम ॥ ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेमेत्यग्निं वै जातं पाप्मा जग्राह तं देवा आहुतीभिः पा-

प्यानमपान्नाद्दुर्नानां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिश्छन्दसाꣳस्वाध्यायेनार्षेयाणꣳ स्वाध्यायैः देवर्षिपितॄणां वा एतन्नं योनृत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता ॥ यस्मित्यार्जे सस्विविदꣳ सन्वायं न तस्य वाव्यपि भागो अस्मि ॥ यदीꣳस्तृणात्यलकꣳस्तृणाति नहि प्रवेदꣳ सुकृतस्य पंथामिति तस्मात्स्वाध्यायोध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टꣳ भवत्योदित्यस्य सायुज्यं गच्छति तदेषाभ्युक्ता॥ ये अर्वाङ्कुत वा पुराणे वेदं विद्वाꣳसमभितो वन्दन्यादित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हꣳसमिति यावतीर्वैदेवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यात्कीर्तयेदेता एव देवताः प्रीणाति ॥ १५ ॥ रिच्यत इव वा एष प्रवरिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वानश्नन्नधीयीत स्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं गायत्रीमन्वाहं चयति वरादक्षिणावरेणैव वरꣳस्तृणोत्यात्मा हि वरः ॥ १६ ॥ दुहे ह वा एष छन्दाꣳसि यो याजयति स येन यज्ञक्रतुना याजयेत्तेनेष्ट्वा परेत्य शुचौ देशे स्वाध्यायमधीयीत तस्मान्नशनं दीक्षा स्थानमुपसद आसनꣳ सुत्या वाग्जुहूर्मनो उपभृद्धृतिर्ध्रुवा प्राणो हविः सामाध्वर्युः स वा एष यज्ञः प्राणदक्षिणोनं तदक्षिणः समृद्धतरः ॥ १७ ॥ कतिधावकीर्णी प्रविशति चतुर्द्धेत्याहुर्ब्रह्मवादिनो मरुतः प्राणेरिन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवतरेण सवेण तस्यैतां प्रायश्चित्तिं विदांचकार सुदेवः काश्यपो यो ब्रह्मचार्यवकिरेदमावास्यायाꣳरात्र्यामग्निं प्रणीयोपसमाधाय द्विराज्यस्योपघातं जुहोति कामावकीर्णोस्म्यवकीर्णोऽस्मि कामकामायस्वाहा कामाभिदुग्धोस्म्यभिदुग्धोस्मि कामकामाय स्वाहेत्यमृतं वा आज्यममृतमेवात्मन्धत्ते

हुत्वा प्रयताञ्जलिः कवातियङ्ङग्निमभिमंत्रयेत सं मासिंचन्तु मरुतः समिन्द्रः सं बृहस्पतिः ॥ संऽमायमग्निः सिंचत्वायुषा च बलेन चायुष्मन्तं करोतमिति प्रतिहार्म्मं मरुतः प्राणान्दधति प्रतीन्द्रो बलं प्रतिबृहस्पतिर्ब्रह्मवर्चसं प्रत्यग्निरितरःसर्वंसर्वतनुभूत्वा सर्वमायुरेति त्रिरभिमंत्रयेत त्रिषत्याहि देवा योऽपूत इव मन्येत स इत्थं जुहुयादित्थमभिमंत्रयेत पुनीत एवात्मानमायुरेवात्मन्धत्ते वरो दक्षिणा वरेणैव वरꣳस्पृणोत्यात्मा हि वरः ॥ १८ ॥ भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवः स्वः प्रपद्ये ब्रह्मप्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति तं प्रपद्ये देवान्प्रपद्ये देवपुरं प्रपद्ये परीवृतो वरीवृता ब्रह्मणा वर्मणाहं तेजसा कश्यपस्य यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधराविष्णुर्हृदयꣳसंवत्सरः प्रजननमश्विनौ पूर्वपादौ वह्निर्मध्यं मित्रावरुणावपरपादौवाग्निः पुच्छंस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थꣳस वा एष दिव्यः शाकरः शिशुमारस्तꣳ ह य एवं वेदापपुनर्मृत्युं जयति जयति स्वर्गं लोकं नाध्वानि प्रमीयते नाग्नौ प्रमीयते नाप्सु प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति ध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरसि त्वं भूतानाꣳ श्रेष्ठोसि त्वांभूतान्युपपर्यावर्तन्ते नमस्ते नमस्ते नमो नमः शिशुकुमाराय नमः ॥ १९ ॥ नमः प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमोनमो दक्षिणायै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो नमः प्रतीच्यै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो नम उदीच्यै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो नम ऊर्ध्वायै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो नमोऽधरायै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो नमोवांतरायै

दिशेः याश्च देवता उभयां प्रतिबर्मन्येताभ्यश्च नमो नमो गङ्गायमुनयोर्मध्ये ये वसन्ति ते मे प्रसन्नात्मानश्चिरं जीवित वर्धयन्ति नमो गङ्गायमुनयोर्मुनिभ्यश्च नमो नमो गङ्गायमुनयोर्मुनिभ्यश्च नमः ॥२०॥ यद्ग रात्र्यां पापमकार्षं यदहा रात्र्यां पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यदहस्तदवलुम्पतु यत्किञ्चेदमहमापोऽभिप्रयुनज्मि यदहा तदभिशमयामि यत्किञ्चेदमहमापोऽभिप्रयुनज्मि यदहा तदभिशमयामि यदद्दीव्यन् पञ्चदशाऽऽयुष्टे चतुस्त्रिंशद्वैश्वानराय पञ्चविंशतिर्वीर्यावतीरग्नेरहं कृष्णाण्डैरजान्हपञ्च ब्रह्मयज्ञेन प्रातर्मध्यंदिने तस्य वै मेघस्तस्य वै द्यौश्चक्ष्यते दुहे ह क्रतिधाऽऽवर्कीणी सूनृतः प्राच्यै विरशनिः ॥ २० ॥ सह ब्रह्मयज्ञेन विरशनिः ॥ २० ॥ हरिः ॐ ॥ नमो ब्रह्मणे नमो० ॥ ॐ शान्तिः ॥

हरिः ॐ ॥ तच्छंयो रावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शांतिः शांतिः शांतिः ॥ हरिः ॐ ॥ ॐ चित्तिःस्रुक् । चित्तमाज्यम् । वाग्वेदिः । आधीतं बर्हिः । केतो अग्निः । विज्ञातमग्निः । वाक्पतिर्होता । मन उपवक्ता । प्राणो हविः । सोमाध्वर्युः । वाचस्पतेविधेनामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोमं पिबतु । आस्माꣳ नृम्णं धात्वाहा ॥ १ ॥ अध्वर्युः पञ्चच ॥ १ ॥ पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्निः । बृहस्पतिरुपवक्ता । वाचस्पते वाचोवीर्येण । संभृततमेनाऽऽयक्ष्यसे । यजमानाय वार्यम् । आभुरस्मभ्यम् । वाचस्पतिः सोमं पिबति । जजनदिन्द्रमिन्द्रियाय स्वाहा ॥ १ ॥ पृथिवी होता दश ॥ २ ॥ अग्निर्होता । अश्विनाध्वर्यू । त्वष्टाग्नीत् । मित्र उपवक्ता । सोमः सोमस्य पुरोगाः । शुक्रः शुक्रस्य पुरोगाः । आतास्त इंद्र सोमाः । वातापेर्ह्वनश्रुतः स्वाहा ॥ १ ॥ अग्निर्होताष्टौ ॥ ३ ॥ सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अंतरिक्षमात्मा । अंगैर्यज्ञं । पृथिवी * शरीरैः । वाचंम्पतेच्छिद्रयावाचा । अच्छिद्रया जुह्वा ।

दिवि दे'वावृधꣳ होत्रामरꣳयस्त्र स्वाहा ॥ १ ॥ सूर्यतनवं ॥ ४ ॥ महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता । वाचस्पते हृद्विधेनामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोममपात् । मादेव्यस्तनुश्छेदिमामनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा ॥ १ ॥ अपात्रोणिंच ॥ ५ ॥ वाग्घोता । दीक्षा पत्नी । वातोऽध्वर्युः । आपो'ऽभिगरः । मनो' हविः । तपसि जुहोमि । भूर्भुवः सुवः । ब्रह्म स्वयंभु । ब्रह्मणे स्वयंभुवे स्वाहा ॥ १ ॥ वाग्घोता नवं ॥ ६ ॥ ब्राह्मण एकहोता । स यज्ञः । स मे' ददातु प्रजां पशून्पुष्टिं यशः । यज्ञश्च मे भूयात् । अग्निर्द्विहो'ता । स भर्ता । स मे' ददातु प्रजां पशून्पुष्टिं यशः । भर्ता च मे भूयात् । पृथिवी त्रिहो'ता । स प्रतिष्ठा ॥१॥ स मे' ददातु प्रजां पशून्पुष्टिं यशः । प्रतिष्ठा च मे भूयात् । अंतरिक्षं चतुर्होता । स विष्ठाः । स मे' ददातु प्रजां पशून्पुष्टिं यशः । विष्ठाश्च मे' भूयात् । वायुः पञ्च होता । स प्राणः । स मे ददातु प्रजां पशून्पुष्टिं यशः । प्राणश्च मे भूयात् ॥ २ ॥ चन्द्रमाः षड्हो'ता । स ऋतून्कल्पयाति । स मे' ददातु प्रजां पशून्पुष्टिं यशः । ऋतवश्च मे कल्पन्ताम् । अन्नꣳसप्त होता । स प्राणस्य प्राणः । स मे ददातु प्रजां पशून्पुष्टिं यशः । प्राणस्य च मे प्राणो भूयात् । चौरष्टहो'ता । सो'नाधृष्यः ॥ ३ ॥ स मे ददातु प्रजां पशून्पुष्टिं यशः । अनाधृष्यश्च भूयासम् । आदित्यो नव होता स तेजस्वी । स मे' ददातु प्रजां पशून्पुष्टिं यशः । तेजस्वी च भूयासम् । प्रजापतिर्दशं होता । स इदꣳ सर्वम् । स मे' ददातु प्रजां पशून्पुष्टिं यशः । सर्वं च मे भूयात् ॥ ४ ॥ प्रतिष्ठा प्राणश्च मे भूयादनाधृष्यः सर्वं

च मे भूयात् ॥ ५ ॥ ब्राह्मणो यज्ञाग्निर्भर्ता पृथिवी प्रतिष्ठान्तरिक्षं विष्टावायुः प्राणश्चन्द्रमा ऋतूनन्नꣳस प्राणस्य प्राणो द्यौरनाधृष्य आदित्यः स वै जर्भा प्रजापतिः स इदꣳसर्वꣳसं च मे भूयात् ॥ ६ ॥ अग्निर्यजुर्भिः । सविता स्तोमैः । इंद्र उक्थामदैः । मित्रावरुणावाशिषा । आङ्गिरसो धिष्ण्यियैरग्निभिः । मरुतः सदो हविर्धानाभ्याम् । आपः प्रोक्षणीभिः । ओषधयो बर्हिषा । अदितिर्वेद्या । सोमो दीक्षया ॥ १ ॥ त्वष्टृध्मेन ॥ विष्णुर्यज्ञेन । वसव आज्येन । आदित्या दक्षिणाभिः । विश्वे देवा ऊर्जा । पूषा स्वगाकारेण । बृहस्पतिः पुरोधया । प्रजापतिरुद्गीथेन । अंतरिक्षं पवित्रेण । वायुः पात्रैः । अहꣳ श्रद्धया ॥२॥ दीक्षया पात्रैरेकं च ॥८॥ सेनेन्द्रस्य । धेना बृहस्पतेः । पथ्या पूष्णः । वाग्वायोः । दीक्षा सोमस्य । पृथिव्यग्नेः । वसूनां गायत्री । रुद्राणां त्रिष्टुक् । आदित्यानां जगती । विष्णोरनुष्टुक् ॥१॥ वरुणस्य विराट् । यज्ञस्य पंक्तिः । प्रजापतेरनुमतिः । मित्रस्य श्रद्धा । सवितुः प्रसूतिः । सूर्यस्य मरीचिः । चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । पर्जन्यस्य विद्युत् । चतसृणां दिशः । चतसृणामवान्तरदिशाः । अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च । आपश्चौषधयश्च । ऊर्क्च सूनृता च देवानां पत्नयः ॥२॥ अनुष्टुक् दिशः षट् च ॥९॥ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यां प्रति गृह्णामि । राजा त्वा वरुणो नयतु । देवि दक्षिणेऽग्नये हिरण्यम् । तेनामृतत्वमश्याम् । वयो दात्रे । मयो महामस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय । कामो दाता ॥ १ ॥ कामः प्रतिग्रहीता । काम समुद्रमाविश । कामं त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाङ्गिरसः प्रतिगृह्णातु । सोमाय वासः । रुद्राय गाम् । वरुणायाश्वम् । प्रजापतये पुरु-

षम् ॥२॥ मनवे तल्पम् । त्वष्ट्रेऽजाम् । पूष्णेऽविम् । निर्ऋत्या अश्वतरगर्दभौ । हिमवतो हस्तिनम् । गन्धर्वाप्सराभ्यः स्रगलङ्करणे । विश्वेभ्यो देवेभ्यो धान्यम् । वाचेऽन्नम् । ब्रह्मण ओदनम् । समुद्रायापः ॥ ३ ॥ उत्तानायाङ्गिरसायानः । वैश्वानराय रथम् । वैश्वानरः प्रत्नथानाकमारुहत् । दिवः पृष्ठं भंदमानः सुमन्मभिः । सधूर्वज्जनयज्जंतवेधनम् । समानमज्मा पर्यावृति जागृविः । राजा त्वा वरुणो नयतु दक्षिणे वैश्वानराय रथम् । तेनामृतत्वमेह्याम् । वयो दात्रे । मयोमह्यमस्तु प्रतिग्रहीत्रे ॥ ४ ॥ क इदं कस्मा अदात् । कामः कामाय । कामो दाता । कामः प्रतिग्रहीता । कामꣳ समुद्रमाविश । कामेन त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते कामदक्षिणा । उत्तानस्वाङ्गिरसः प्रतिगृह्णातु ॥ ५ ॥ दाता पुरुषमापः प्रतिग्रहीत्रे नवं च ॥ १० ॥ सुवर्णं घर्मं परिवेद वेनम् । इन्द्रस्यात्मानं दशधा चरन्तम् । अन्तःसमुद्रे मनसाचरन्तम् । ब्रह्मान्वविन्दद्दशहोतारमर्णे । अन्तःप्रविष्टः शास्ता जनानाम् । एकः सन्बहुधा विचारः । शतꣳशुक्राणि यत्रैकं भवंति । सर्वे वेदा यत्रैकं भवन्ति । सर्वे होतारो यत्रैकं भवन्ति । स मानसीन आत्मा जनानाम् ॥ १ ॥ अंतःप्रविष्टः शास्ता जनानाꣳ सर्वात्मा । सर्वाः प्रजा यत्रैकं भवन्ति । चतुर्होतारो यत्र संवदं गच्छन्ति देवैः । स मानसीन आत्मा जनानाम् । ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम् । देव आत्मानꣳसावितारं बृहस्पतिम् । चतुर्होतारं प्रदिशोनुरूपं वाचो वीर्यं तपसान्वविन्दत् । अन्तःप्रविष्टं कर्तारमेतम् । त्वष्टारꣳरूपाणि विकुर्वतं विपश्चिम् । अमृतस्य प्राणं यज्ञमेतम् । चतुर्होतृणामात्मानं कवयो निचिक्युः । अंतःप्रविष्टं कर्तारमेतम् । देवानांबन्धुनिहितं गुहासु । अमृतेनं रूपं यज्ञमेतम् । चतुर्होतृणामात्मानं कवयो निचिक्युः । शतं नियुतः परि वेद विश्वाविश्ववारः । विश्व-

मिदं पृणाति । इन्द्रस्यात्मानि हितः पंचहोता । अमृतं देवानामायुः प्रजानाम् ॥ ३ ॥ इन्द्रः राजानश्चमितारमेनम् । वायोरात्मानं कवयो निचेक्युः । त्रिशत्रमीणां मध्ये तपन्तम् । ऋतस्य पदं कवयो निपान्ति । य आपश्चंद्रं भुवनं बिभर्ति । अनिभिण्णः सप्तलोकान्विचष्टे । यस्याण्डकोशश्चर्मभाहुः प्राणमुन्नम् । तेन कृणोमृते नाहमभ्मि । सुवर्णं कायश्चजसा परीवृतम् । देवानां वनुयामीविराजम् ॥ ४ ॥ अमृतस्य पूर्णामासुकलां विचक्षन पादश्चद्वानुनकिर्लोकमित्से । येनर्तवः पंचधोतकृप्ताः । उत या यज्ञा मनसोतकृप्ताः । तश्चद्वोतारमृतुभिः कल्पमानम् । ऋतस्य पदे कवयो निपान्ति । अन्तःप्रविष्टं कर्तारमेनम् । अंतश्चन्द्रमसि मनसाचरन्तम् । सप्तैव संतं नविजानंतिदेवाः । इंद्रस्यात्मानश्चतया चरन्तम् ॥ ५ ॥ इन्द्रो राजा जगतो य ईशे । सप्तहोता सप्तधा विकृप्तः । परेण तन्तुं परिविश्यमानम् । अन्तरादित्ये मनसा चरन्तम् । देवानाश्चहृदयं ब्रह्मान्वविन्दन् । ब्रह्मैतद्ब्राह्मणश्चजभार । अर्कश्चोतन्तश्चरीरस्य मध्ये । आयास्मित्सप्त परवः । मेहन्ति बहुलाश्चश्रियम् । बह्वग्नीन्द्रगोमतीम् ॥ ६ ॥ अच्युतां बहुलाश्चश्रियम् । सहस्रिर्विमुचिनमः । गोमन्द्राय पिन्वते । बह्वग्नीन्द्रगोमतीम् । अच्युतां बहुलाश्चश्रियम् । मह्यमिन्द्रो नियच्छतु । शतश्चशा अन्य युक्ता तरीणाम् । अवाक्रियातु वर्मुभीरश्मिरिन्द्रः । प्रमश्चहसाणो बहुलाश्चश्रियम् । राशिमारिन्द्रःसावित्र मे नियच्छतु ॥ ७ ॥ वृतं तेजो मधुमदिन्द्रियम् । मय्ययमग्निर्दधातु । हरिः पतङ्गः पटरी सुपर्णः । दिविक्षयो नभसा य एति । स न इन्द्रः कामवरं ददातु । पंचारं चक्रं परिवर्ततेपृथु । हिरण्यज्योतिः सरिरस्य मध्ये । अजस्रं ज्योतिर्नभसा उपेदिति । स न इन्द्रः कामवरं ददातु । सप्तयुंजन्ति रथमेकचक्रम् ॥ ८ ॥ एको

अश्वो॑ वहति सप्तनामा । त्रिनाभिचक्रमजरमनर्वम् । येनेमा विश्वा भुवनानि तस्थुः । भद्रं पश्यंत उपसेदुरग्रे॑ । तपो॑दीक्षामृषयः सुवर्विदः । ततः क्षत्रं बलमोजश्चजातम् । तदस्मै देवा अभिसन्नमन्तु । श्वेतꣳरश्मिं वो॑भुज्यमानम् । अपान्नेतारं भुवनस्य गोपाम् । इंद्रान्निचिक्युः परमे व्योमन् ॥ ९ ॥ रोहिणीः पिङ्गला एकरूपाः । क्षरन्तीः पिङ्गला एकरूपाः । शतꣳसहस्राणि प्रयुतानि नाव्यानाम् । अयं यः श्वेतोरश्मिः । पारिसर्वमिदं जगत् । प्रजां पशून्धनानि । अस्माकं ददातु । श्वेतो रश्मिः पारिसर्व॑बभूव । सुवन्मह्यं पशून्विश्वरूपान् । पतङ्गमक्तमसुरस्य मायया ॥ १० ॥ हृदा पश्यंति मनसा मनीषिणः । समुद्रे अंतः कवयो विचक्षते । मरीचीनां पदमिच्छंतिवेधसः । पतङ्गोवाचंमनसा बिभर्ति । तां गंधर्वो॑वदद्गर्भे॑ अंतः । तां द्योतमानाꣳ स्वर्यं मनीषाम् । ऋतस्य पदे कवयो निपान्ति । ये ग्राम्याः पशवो॑ विश्वरूपाः । विरूपाः संतो॑ बहुधैकरूपाः । अग्निस्ताꣳ अग्रे प्रमुमोक्तु देवः ॥ ११ ॥ प्रजापतिः प्रजया संविदानः । वीतꣳस्तुके स्तुके । युवमस्मासु नियच्छम् । प्रप्रयज्ञपतिं तिर । ये ग्राम्याः पशवो॑ विश्वरूपाः । विरूपाः संतो॑ बहुधैकरूपाः । तेषाꣳसप्तानामिहरंतिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । य आरण्याः पशवो॑विश्वरूपाः । विरूपाः संतो॑ बहुधैकरूपाः ॥ १२ ॥ वायुस्ताꣳ अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः । इडायै सूप्तं घृतवच्चराचरम् । देवा अन्वविन्दन्गुहाहितम् । य आरण्याः पशवो॑ विश्वरूपाः । विरूपाः संतो॑ बहुधैकरूपाः । तेषाꣳसप्तानामिहरंतिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ १३ ॥ आत्माजनानां विकुर्वन्तं विपश्चिं प्रजानां वसुधानीं विराजं चरन्तं गोमतीं मे नियच्छत्वेकचक्रं व्योमन्मायया देव एकरूपा अष्टौ च ॥ ११ ॥

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । सभूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलम् । पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतोज्यायाꣳश्च पूरुषः ॥ १॥ पादोस्य विश्वाभूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधिपूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसंतो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः । सप्तास्यासन्परिधयः । त्रिःसप्तसमिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥ तेन देवा अयजंत । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे । छंदाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥ तस्मादश्वा अजायन्त । ये केचोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ५ ॥ यदस्य यद्वैश्यः । पभ्यांꣳशूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदंतरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पभ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ॥ ६ ॥ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्यधीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिश-

श्वतमः। तमेव विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन वाङ्मयजंत देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः संति देवाः ॥ ७ ॥ पुरुषः पुरोप्रतोऽजायत कृताकल्पयज्ञासं द्वेचं ॥ १३ ॥ अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्ततायि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेव विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते ॥ १ ॥ तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे। ह्रीश्चते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण ॥ २ ॥ जायत वशे सप्त च ॥ १४ ॥ भर्त्ता सन्भ्रियमाणो बिभर्ति। एको देवो बहुधा निविष्टः। यदा भारं तन्दधते स भर्तुम्। निधाय भारं पुनरुत्तमेति। तमेव मृत्युममृतं तमाहुः। तं भर्त्तारं नमुनोत्तारमाहुः। स भूतो भ्रियमाणो बिभर्ति। य एनं वेद सत्येन भर्तुम्। सद्यो जातमुत जहात्येषः। उतो जरन्तं न जहात्येकम् ॥१॥ उतो बहूनेकमहर्जहार। अतन्द्रो देवः सदमेव पार्थः। यद्वेद यत आबभूव। सन्धां च यास्संदधे ब्रह्मणस्पतिः। रमते तस्मिन्नुत जीर्णे शयाने। नैनं जहात्यहःसु पूर्व्येषु। त्वामापो अनुसर्वा अरंति जानतीः। वत्सं पयसा पुनानाः। वसो अग्ने हव्यवाहं समिन्धत्से त्वं भर्त्ता मातरिश्वा प्रजानाम् ॥ २ ॥ त्वं

यज्ञस्त्वमु देवासि सोमः । तवदेवाहवमायंति सर्वे । त्वमेको ऽसि बहुननुप्रविष्टः । नमस्ते अस्तु मुहवो म एधि । नमोवामस्तु शृणुतꣳहवं मे । प्राणापानावजिरꣳसंचरन्तौ । द्वयामि वां ब्रह्मणातूतमेतम् । यो मां द्वेष्टि तं जहितं युवाना । प्राणापानौ संविदानौ जहितम् । अमुष्यामुनामासंगसाधाम् ॥ ३ ॥ तं मे देवा ब्रह्मणासंविदानौ । वधार्यं दत्तं तमहꣳहनामि । असंज्जजान सत आबभूव । यं यं जजानस उगोपो अस्य । यदाभारं तन्द्रयंते स भर्तुम् । परास्य भारं पुनरस्तमेति । तद्वै त्वं प्राणो अभवः । महान्भागः प्रजापतेः । मुंजः करिष्यमाणः । यद्देवान्प्राणयो नवं ॥ ४ ॥ एकं प्रजानां गसाधां नवं ॥ १५॥ हरिꣳहरंतमनुयन्ति देवाः । विश्वस्येशानं वृषभं मतीनाम् । ब्रह्मसरूपमनुमेदमागात् । अयनं माविवर्धीर्विक्रमस्व । मा छिदो मृत्यो मावधीः । मा मे बलं तिरोमाप्रमोषीः । प्रजां मा मे रीरिष आयुरुग्र । नृचक्षसं त्वा हविषा विधेम । सद्यश्चकमानाय । प्रवेपानाय मृत्यवे ॥ १ ॥ प्रास्मा आशां अशृण्वन् । कामेनाजनयन्पुनः । कामेन मे काम आगात् । हृदयाद्धृदयं सूत्योः । यन्मीषामदः प्रियम् । तदैतूषमामभि । परं मृत्यो अनुपरे हि पन्थाम् । यस्ते स इतरो देवयानात् । च मुष्मते शृण्वते ते ब्रवीमि । मा नः प्रजाꣳरीरिषो मोतवीरान् । प्रपूर्व्य मनसा वन्दमानः । नाधमानो वृषभं चर्षणीनाम् । यः प्रजानामेकराण्मानुर्पाणाम् । मृत्युं यजे प्रथमजामृतस्य ॥ २ ॥ मृत्यवे वीराꣳश्चत्वारिंच ॥ १६ ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासिरोचनम् । उपयामगृहीतोसि सूर्याय त्वा भ्राजस्वते ॥ एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥ १ ॥ तरणिर्विꣳशतिः ॥ १७ ॥ आप्यायस्व मदिंतम सोम विश्वाभिरूतिभिः । भवानः सप्रथस्तमः ॥ १ ॥ आनवं ॥ १८ ॥ ईयुष्टे ये

पूर्वेतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः। अस्माभिरूनु प्रतिचक्ष्यांभूदो ते यंति ये अपरीषु पश्यान् ॥ १ ॥ ईयुरेकान्नत्रिंशत् ॥ १९ ॥ ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वासादयामि ज्योतिर्विदं त्वासादयामि भास्वतीं त्वा सादयामि ज्वलंतीं त्वा सादयामि मल्मलाभवंतीं त्वासादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयंतीं त्वा सादयामि जाग्रतीं त्वा सादयामि ॥ ज्योतिष्मतीरष्टात्रिंशत् ॥२०॥ प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासायस्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ प्रयासाय चतुर्विंशतिः ॥ २१ ॥ चित्तꣳ संतानं भवं यक्ष रुद्रं तनिम्नापशुपतिꣳस्थूलहृदयेनाग्निं हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमंतः पार्श्वेनोपिंशहनꣳशिंगीनि कोश्याभ्याम । चित्तमष्टादश ॥२२॥ चित्तिः पृथिव्याग्निः सूर्य ते चक्षुर्महाहविर्होता वाग्घोता ब्राह्मण एक होताऽग्निर्यजुर्भिः सेनेन्द्रस्य देवस्य सुवर्ण घर्मꣳ सहस्रशीर्षाद्भ्यो भर्ता हरितरणिराय्यायस्वयुष्टये ज्योतिष्मतीं प्रयासाय चित्तमेकविंशतिः ॥ २१ ॥ चित्तिरग्निर्यजुर्भिरन्तःप्रविष्टः प्रजापतिर्भर्ता प्रयासायाधिपंचाशत् ॥ ५२ ॥ तच्छं यो रावृणीमहे० शनो अस्तु द्विपदेशं चतुष्पदे । ॐ शांतिः शांतिः शांतिः । हरिः ॐ

इति अरणक तृतीयप्रश्नः समाप्तः ॥ ३ ॥

हरिः ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो मामामृषयो मंत्रकृतो मंत्रपतयः । परादुर्मोहमृषिभ्यो मंत्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासꣳ

शंवामदंस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्मेचन्द्रश्च सूर्यश्च शर्म ब्रह्म प्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूया उपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मामाहासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदंतु । ॐ शान्तिः शांतिः शांतिः ॥

हरिः ॐ । युंजते मन उत युंजते धियः । विप्रा विप्रस्य बृहतो विपश्चितः विहोत्रा दधे वयुना विदेक इत् । महीदेवस्य सवितुः परिष्टुतिः ॥ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यामाददे । अग्निरसि नारिरसि । अक्षरकूहवेभ्यः । उत्तिष्ठ ब्रह्मणस्पते ॥ १ ॥ देवयंतस्त्वेमहे । उपयंतु मरुतः सुदानवः । इंद्रप्राशूर्भवासचा । प्रेतु ब्रह्मणस्पतिः । प्रदंक्षिणित्सृतृवा । अच्छावीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयंतु नः । देवी द्यावापृथिवी अनुमेमे सायाम् । ऋध्यासमद्य । मख्यस्य शिरः ॥ २ ॥ मखाय त्वा । मख्यै त्वा शीर्ष्णे । इयत्यग्रे आसीः । ऋध्यासमद्यम् । मख्यस्य शिरः । मखाय त्वा । मख्यै त्वा शीर्ष्णे । देवावश्विनाध्वर्यू भूतस्य प्रथमजा ऋतावरीः । ऋध्या समद्य । मख्यस्य शिरः ॥ ३ ॥ मखाय त्वा । मख्यै त्वा शीर्ष्णे । इन्द्रस्यौजोसि । ऋध्यासमद्य । मख्यस्य शिरः । मखाय त्वा । मख्यै त्वा शीर्ष्णे । अग्निजा असि प्रजापतेरेनः । ऋध्यासमद्य । मख्यस्य शिरः ॥ ४ ॥ मखाय त्वा मख्यै त्वा शीर्ष्णे । आयुर्धेहि प्राणं धेहि । अपानं धेहि

ध्यानं धेहि । चक्षुर्धेहि श्रोत्रं धेहि । मनो धेहि वाचं धेहि । आत्मानं धेहि प्रतिष्ठां धेहि । मां धेहि मयि धेहि । मधु त्वा मधुला करोतु । मखस्य शिरोसि ॥ ७ ॥ यज्ञस्य पदन्थः । गायत्रेण त्वा छन्दसा करोमि । त्रैष्टुभेन त्वा छन्दसा करोमि । जागतेन त्वा छन्दसा करोमि । मखस्य रास्नासि । अदितिस्ते बिलं गृह्णातु । पाङ्क्तेन छन्दसा । सूर्यस्य हरसा श्राय मखांसि ॥ ६ ॥ पतोशिरक्रतावरीर्ऋध्यासमद्य मखस्य शिरः शिरोसि नवं च ॥ १ ॥ इयंतेदक्षिरिन्द्रस्यौजोस्यग्निजा अन्यायुर्धेहिप्राणंपंच ॥

वृष्णो अश्वस्य निष्पदोसि । वरुणस्त्वा धृतव्रत आधूपयतु । मित्रावरुणयोर्ध्रुवेण धर्मणा । अर्चिषे त्वा । शोचिषे त्वा । ज्योतिषे त्वा । तपसे त्वा । अमीमं महिना दिवम् । मित्रो बभूव सप्रथाः । उतश्रवसा पृथिवीम् ॥ १ ॥ मित्रस्य चर्षणी धृतः । श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमं । सिध्यं त्वा । देवस्त्वा सवितोद्वपतु । सुपाणिः स्वङ्गुरिः । सुबाहुरुतशक्त्या । अपद्यमानः पृथिव्याम् । आशादिश आपृण । उत्तिष्ठ बृहन् भव ॥ २ ॥ ऊर्ध्वस्तिष्ठ ध्रुवस्त्वम् । सूर्यस्त्वा चक्षुषान्वीक्षे । ऋजवेत्वा । साधवेत्वा । सुक्षित्यै त्वा भूत्यै त्वा । इदमहममुमामुष्यायणं विश्वापशुभिर्ब्रह्मवर्चसेन पर्यूहामि । गायत्रेण त्वा छन्दसा ऽऽच्छृणद्मि । त्रैष्टुभेन त्वा छन्दसाऽऽच्छृणद्मि । जागतेन त्वा छन्दसाच्छृणद्मि । छृणत्तु त्वा वाक् । छृणत्तु त्वोर्क् । छृणत्तु त्वा हविः । छृन्धि वाचम् । छृन्ध्यूर्जम् । छृन्धि हविः । देवपुरश्चरसन्यासं त्वा ॥ ३ ॥ पृथिवीभव वाक् षट् ॥ २ ॥ ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामः । होर्तर्धर्ममभिष्टुहि । अग्नौ द्रोहिणो पुरोडाशावधिश्रय । प्रतिप्रस्थातर्विहर । प्रस्तोतः सामानि गाय । यजुर्युक्तꣳ सामभिराक्तꣳ त्वा । विश्वेदेवैरनुमतं मरुद्भिः । दक्षिणाभिः प्रतितं पारयिष्णुम् । स्तुभो

वहंतु सुमनस्यमानम् । स नो रुचं धेह्यहृणीयमानः। भूर्भुवः सुवः । ओमिन्द्रवंतः प्रचरत ॥ १ ॥ अहृणीयमानो द्वे च ॥ २ ॥ ब्रह्मन्प्रचरिष्यामः । होतर्धर्ममभिष्टुहि। यमाय त्वा मखाय त्वा। सूर्यस्यहरसे त्वा । प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा ॥ चक्षुषे स्वाहा श्रोत्राय स्वाहा । मनसे स्वाहा वाचे सरस्वत्यै स्वाहा । दक्षाय स्वाहा क्रतवे स्वाहा । ओजसे स्वाहा बलाय स्वाहा । देवस्त्वा सविता मध्वाऽनक्तु ॥ १ ॥पृथिवीं तर्पसस्रायस्व । आचिरसि शोचिरसि ज्योतिरसि तपो ऽसि । सरसीदस्व महाऽसि । शोचस्व देववीतमः ।विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् । अंजतियंग्रथयंतो न विप्राः। वपावन्तं नाग्निना तर्पन्तः। पितुर्न पुत्र उपसि प्रेष्ठः। आघर्मो अग्निरतपन्नसादीत् ॥२॥ अनाधृष्या पुरस्तात् । अग्नेराधिपत्ये । आयुर्मेदाः। पुत्रवती दक्षिणतः । इंद्रस्याधिपत्ये । प्रजां मे दाः । सुषदा पश्चात् । देवस्य सवितुराधिपत्ये । प्राणं मे दाः आश्रुतिरुत्तरतः ॥ ३ ॥ मित्रावरुणयोराधिपत्ये । श्रोत्रं मे दाः । विधृतिरुपरिष्टात् । बृहस्पतेराधिपत्ये । ब्रह्मेदाः क्षत्रं मेदाः । तेजो मे वा वर्चो मे धाः । यशो मेधासपो मे धाः । मनो मे धाः । मनोरश्वासिभूरिपुत्रा । विश्वाभ्योमानाष्ट्राभ्यः पाहि ॥ ४ ॥ सुपसदामेमूयामामोहिरसीः । तपोष्पत्रेअंतरा ऽमित्रान् । तपाशरसमररुषः परस्य । तपो वसो चिकितानो अचित्तान् । विते तिष्ठंतामजरा अयासः । चितस्थपारोचितः । स्वाहामरुद्भिःपरिश्रयस्व । मा असि । प्रमा असि । प्रतिमा असि॥५॥ समा असि । विमा असि । उन्मा असि । अन्तरिक्षस्यान्तर्धिरसि । दिवं तर्पसस्रायस्व । आभिर्गीर्भिर्यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिगोत्रा रुजासि । भूयिष्ठभाजो अधं ते स्याम । शुक्रं ते

ACADEMY OF RESEARCH
LIBRARY
Acc No. 21383

अन्यद्यजतं ते अन्यदु पर्व ॥ विपुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावः। भद्रा ते पूषन्निह रातिरस्तु। अहीन्विभर्षि सायकानि धन्व। अहन्निष्कं यजतं विश्वरूपम्। अहन्निदं दयसे विश्वमभ्वम्। न वा ओजीयो रुद्र त्वदस्ति। गायत्रमसि। त्रैष्टुभमसि। जागतमसि। मधु मधु मधु ॥ ७ ॥ अनक्त्वसादीदुत्तरतः पाहि प्रतिमा असि यजतं ते अन्यज्जागतमस्येकं च ॥ इति चतुर्थ प्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

दश प्राचीर्दशं भासि दक्षिणा। दश प्रतीचीर्दशं भास्युदीचीः। दशोर्ध्वा भासि सुमनस्यमानः। स नो रुचं धेह्यर्हणीयमानः। अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण छन्दसा। समा रुचितो रोचय। इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा। स मा रुचितो रोचय। वरुणस्त्वादित्यैः पश्चाद्रोचयतु जागतेन छन्दसा। स मा रुचितो रोचय ॥ १ ॥ द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा। स मा रुचितो रोचय। बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसा। स मा रुचितो रोचय। रोचितस्त्वं देव घर्म देवेष्वसि। रोचिषीयाहं मनुष्येषु। सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चस्यसि। रुचितोऽहं मनुष्येष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चसी भूयासम्। रुग्असि। रुचं मयि धेहि ॥ २ ॥ मयि रुक्। दश पुरस्ताद्रोचसे। दश दक्षिणा। दश प्रत्यङ्। दशोदङ्। दशोर्ध्वो भासि सुमनस्यमानः। स नः सम्राडिषमूर्जं धेहि। वाजी वाजिनं पवस्व। रोचितो घर्मो रुचीय ॥ २ ॥ रोचय धेहि नव च ॥षष्ठोनुवाकः ॥

अपश्यं गोपामनिपद्यमानम्। आ च परा च पथिभिश्चरन्तम्। स सध्रीचीः स विषूचीर्वसानः। आवरीवर्ति भुवनेष्वन्तः। अत्र ग्रावाः। मधुमाध्वीभ्यां

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571431

मधुमाधवीभ्याम् । अनु वां देववीतये । समग्निरग्निना गत । सं देवेन सवित्रा सꣳ सूर्येण रोचते ॥ १ ॥ स्वाहा समग्निस्तपसा गत । सं देवेन सवित्रा । सꣳसूर्येणारोचिष्ट । धर्त्रा दिवो विभासि रजसः । पृथिव्या धर्त्रा । उरोरन्तरिक्षस्य धर्त्रा । धर्त्रा देवो देवानाम् । अमर्त्यस्त्वपोजाः । हृदे त्वा मनसे त्वा । दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं कृधि । दिवि देवेषु होत्रा यच्छ । विश्वासां भुवांपते । विश्वस्य भुवनस्पते । विश्वस्य मनसस्पते । विश्वस्य वचसस्पते । विश्वस्य तपसस्पते । विश्वस्य ब्रह्मणस्पते । देवश्रुस्त्वं देव घर्म देवान्पाहि । तपोजां वाचमस्मे नियच्छ देवायुवम् ॥३॥ गर्भो देवानाम् । पिता मतीनाम् । पतिः प्रजानां । मतिः कवीनाम् । संदेवो देवेन सावित्रा योतिष्ट । सꣳसूर्येणारुक । आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि । पिता नोऽसि पितानोभव । आयुर्धास्तनूधाः पयोधाः । वर्चोदा वरिवोदा द्रविणोदाः ॥ ४ ॥ अंतरिक्ष प्र उरोर्वरीयान् । अर्शामाहित्वा मा माहिꣳसीः । त्वमग्ने गृहपतिर्विशामसि । विश्वासां [illegible] । शतं पूर्भिर्वविष्ठपाह्यꣳहसः । समेद्धारꣳशतहिमाः । तन्त्रावियꣳ हार्दिवानम् । इहैव रातयः संतु । त्वष्टुमती वे सपेय । सुरेता रेतो दधाना । वीरं विदेय तव संदृशि । माहꣳरायस्पोषेण वियोषम ॥५॥ रोचते सूर्याय त्वा देवायुवꣳ द्रविणोदा दधाना द्वे च ॥ ६ ॥ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यामाददे । अदित्यै रास्नासि । इडं एहि । अदित एहि । सरस्वत्येहि । असावेहि । असावेहि । असावेहि ॥ १ ॥ अदित्या उष्णीषमसि । वायुरस्यैडः । पृथा त्वोपावꣳसृजतु । अश्विभ्यां प्रदापय । यस्ते स्तनः शशयो यो मयोभूः । येन विश्वा पुष्यसि वार्याणि । यो रत्नधावसुविद्यः सुदत्रः । सरस्वति तमिह धातवेऽकः ।

उस्रं घर्मꣳशिꣳष। उस्रं घर्मं पाहि॥ २॥ धर्माय शिꣳष। बृहस्पतिस्त्वोपसीदतु। दानवः स्थपरेवः। विष्वग्वृतो लोहितेन। अश्विभ्यां पिन्वस्व। सरस्वत्यै पिन्वस्व। पूष्णे पिन्वस्व। बृहस्पतये पिन्वस्व। इंद्राय पिन्वस्व। इंद्राय पिन्वस्व॥ ३॥ गायत्रोसि। त्रैष्टुभोऽसि। जागतमसि। सहोजो भागेनोपमेहि। इंद्राश्विना मधुनः सारघस्य। घर्मं पात वसवो यजता वट्। स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि। मधु हाविरसि। सूर्यस्य तपस्तप। द्यावापृथिवीभ्यां त्वा परिगृह्णामि॥ ४॥ अंतरिक्षेण त्वोपयच्छामि। देवानां त्वा पितृणामनुमतोभर्तुꣳशकेयम्। तेजोसि। तेजोनुप्रेहि। दिविस्पृङ्मामाहिꣳसीः। अंतरिक्षस्पृङ्मामाहिꣳसीः। पृथिविस्पृङ्मामाहिꣳसीः। सुवरसि सुवर्मे यच्छ। दिवंयच्छ दिवो मा पाहि॥ ५॥ एहि पाहि पिन्वस्व गृह्णामि नव च॥ ८॥ समुद्राय त्वा वाताय स्वाहा। सलिलाय त्वा वाताय स्वाहा। अनाधृष्यायं त्वा वाताय स्वाहा। अप्रतिधृष्यायं त्वा वाताय स्वाहा। अवस्यवे त्वा वाताय स्वाहा। दुवस्वते त्वा वाताय स्वाहा। शिमिद्वते त्वा वाताय स्वाहा। अग्नये त्वा वसुमते स्वाहा। सोमाय त्वा रुद्रवते स्वाहा। वरुणाय त्वाऽऽदित्यवते स्वाहा॥ १॥ बृहस्पतये त्वा विश्वदेव्यावते स्वाहा। सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा। यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। विश्वाआशादक्षिणसत्। विश्वां देवानयाडिह। स्वाहा कृतस्य धर्मस्य। मधोः पिबतमश्विना। स्वाहाग्नये यज्ञियाय। शं यजुर्भिः। अश्विना घर्मं पातꣳहार्दिवानम्॥ २॥ अहार्दिवाभिरूतिभिः। अनु वां द्यावापृथिवी मꣳसाताम्। स्वाहेन्द्राय। स्वाहेन्द्रावट्। घर्ममपातमश्विना हार्दिवानम्। अहार्दिवाभिरूतिभिः। अनुवांद्यावापृथिवी अमꣳसाताम्। तं प्राव्यं यथावट्। नमो

दिवे। नमः पृथिव्यै। दिविधा इमं यज्ञम्। यज्ञमिमंदिविधाः। दिवं गच्छ। अंतरिक्षं गच्छ। पृथिवीं गच्छ। पंच प्रदिशो गच्छ। देवान्धर्मपान्गच्छ। पितृन्धर्मपान्गच्छ ॥ ३ ॥ आदित्यवते स्वाहा हार्दिवानं पृथिव्या अष्टौ च ॥९॥ इषेपीपिहि। ऊर्जेपीपिहि। ब्रह्मणे पीपिहि। क्षत्राय पीपिहि। अभ्यः पीपिहि। ओषधीभ्यः पीपिहि। वनस्पतिभ्यः पीपिहि। द्यावापृथिवीभ्यांपीपिहि। सुभूतायं पीपिहि। ब्रह्मवर्चसाय पीपिहि ॥ १ ॥ यजमानाय पीपिहि। मह्यं ज्यैष्ठ्यायपीपिहि। त्विष्यैत्वा। द्युम्नाय त्वा। इन्द्रियाय त्वा भूत्यै त्वा। धर्मासि सुधर्मामेन्यस्मे। ब्रह्माणि धारय। क्षत्राणि धारय। विशं धारय। नेत्त्वावातस्कंदयात् ॥ २ ॥ अमुष्य त्वा प्राणे सादयामि। अमुना सह निरर्थं गच्छ। योस्मान्द्वेष्टि। यं च वयं द्विष्मः। पूष्णे शरसे स्वाहा। ग्रावभ्यः स्वाहा। प्रतिरेभ्यःस्वाहा। द्यावापृथिवीभ्याꣳ स्वाहा। पितृभ्योधर्मपेभ्यः स्वाहा। रुद्राय रुद्रहोत्रे स्वाहा ॥ ३ ॥ अहर्ज्योतिः केतुना जुषताम्। सुज्योतिर्ज्योतिषाꣳ स्वाहा। रात्रिर्ज्योतिः केतुना जुषताम्। सुज्योतिर्ज्योतिषाꣳ स्वाहा। अपीपरो माऽह्नो रात्रियैमापाहि। एषा ते अग्ने समित्। तया समिध्यस्व। आयुर्मेदोः। वर्चसा माऽऽज्ञीः। अपीपरो मारात्रिया अह्नो मा पाहि ॥४॥ एषाते अग्ने समित्। तया समिध्यस्व। आयुर्मे दाः। वर्चसामांजीः। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा। सूर्योज्योतिर्ज्योतिः सूर्यःस्वाहा। भूः स्वाहा। हुतꣳहविः। मधु हविः। इन्द्रतमेग्नौ। पिता नोऽसि मामाहिꣳसीः। अश्यामं ते देव घर्म। मधु मतो वाजवतः पितुमतः। अङ्गिरस्वतः स्वधाविनः। अशीमहि त्वा मामाहिꣳसीः। स्वाहा त्वा सूर्यस्यरश्मिभ्यः। स्वाहा त्वा नक्षत्रेभ्यः॥५॥ ब्रह्मवर्चसाय पीपिहि स्कंदयाद्रुद्राय रुद्रहोत्रे स्वाहाऽह्नो मापाह्यग्नौ सप्तचं १०॥

घर्मया ते दिवि शुक्रा या गायत्रे छंदसि । या ब्राह्मणे । या हविर्धाने । तां त एतेनावयजे स्वाहा । घर्मया ते ऽन्तरिक्षे शुक्रा या त्रैष्टुभे छंदसि । या राजन्ये । याग्नीध्रे । तां त एतेनावयजे स्वाहा ॥१॥ घर्मया ते पृथिव्याश्शुक्रा या जागते छंदसि । या वैश्ये । या सदसि । तां त एतेनावयजे स्वाहा । अनुनोऽद्यानुमतिः । अन्विदनुमते त्वम् । दिवस्त्वा परस्पायाः । अंतरिक्षस्य तनुवः पाहि । पृथिव्यास्त्वा धर्मणा ॥ २ ॥ वयमनुक्रामाम सुविताय नव्यसे । ब्रह्मणस्त्वापरस्पायाः । क्षत्रस्य तनुवः पाहि । विशस्त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे । प्राणस्य त्वा परस्पायै । चक्षुषस्तनुवः पाहि । श्रोत्रस्य त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे । वल्गुरसि शं युधायाः ॥३॥ शिशुर्जनधायाः । शं च वक्षि परिं च वक्षि । चतुः स्रक्तिर्नाभिर्ऋतस्य । सदो विश्वायुः शर्म सप्रथाः । अपद्वेषो अपह्वरः । अन्यव्रतस्य सश्चिम । घर्मोऽसि ऽन्नमेतत्पुरीषम् । तेन वर्धस्व चाचंप्यायस्व । वर्द्धिषीमहि च वयम् । आचंप्यासिषीमहि ॥४॥ रंतिर्नामासि दिव्यो गंधर्वः । तस्य ते पद्वद्धविर्धानम् । अग्निरध्यक्षः । रुद्रोधिपतिः । समहमायुषा । संप्राणेन । संवर्चसा । संपयसा । सं गौपत्येन । सश्रायस्पोषेण ॥ ५ ॥ व्यसौ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । अचिक्रदद्वृषा हरिः । महान्मित्रो न दर्शतः । सञ्सूर्येण रोचते । चिदसि समुद्रयोनिः । इंदुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुव आनिषत्तः ॥ ६ ॥ नमस्ते अस्तु मामाहिंसीः । विश्वावसुꣳ सोमगंधर्वम् । आपो दद्दृशुषीः । तद्देतेनाब्यायन् । तदन्वैवत् । इंद्रो रारहाण आसां । परिसूर्यस्य परिधीꣳरपश्यत् । विश्वावसुरभितन्नो गृणातु । दिव्यो गन्धर्वो रजसो विमानः । यद्वा घा सत्यमुत यन्न विद्म ॥ ७ ॥ धियो

हिन्वानो धिय इन्नो अव्यात्। सस्निमविंदच्चरणे नदीनाम्। अपावृणो-
दुरो अश्मव्रजानाम्। प्राऽऽसां गन्धर्वो अमृतानिवोचत्। इंद्रो दक्षं परि-
जानादहीनम्। एतत्त्वं देव धर्म देवो देवानुपागाः। इदमहं मनुष्यो
मनुष्यान्। सोमपीथानु मेहि। सह प्रजया सह रायस्पोषेण। सुमित्रा
न आप ओषधयः संतु। दुर्मित्रास्तस्मै भूयासुः। योऽस्मान्द्वेष्टि। यं च
वयं द्विष्मः। उद्वयं तमसस्परि। उदुत्यं चित्रम्। इममूषुत्यमस्मभ्यंसनिम्।
गायत्रं नवीयाःसम्। अग्ने देवेषु प्रवोचः ॥८॥ याग्नीध्रे तां त एतेनावयजे
स्वाहा धर्मणाशंयुधायाः प्यासिषी महिपोषेण निषक्तोविद्यसं त्वष्टाचं ॥११॥
महीनां पयोसि विहितं देवत्रा। ज्योतिर्भा असि वनस्पतीनामोषधीनाःरसः।
वाजिनं त्वा वाजिनोऽवनयामः। ऊर्ध्वं मनः सुवर्गम् ॥ १२॥ अस्कान्द्यौः
पृथिवीम्। अस्कानृषभो युवा गाः। स्कन्नेमाविश्वा भुवना। स्कन्नो यज्ञः प्रज-
नयतु। अस्कानर्जनि प्राजनि। आस्कन्नाजायते वृषा। स्कन्नात्प्रजनिधीमहि
॥ १३ ॥ यापुरस्ताद्बुद्विदापतत्। तां त एतेनावयजे स्वाहा। या दक्षिणतः।
या पश्चात्। योत्तरतः। योपरिष्टाद्बिद्युदापतत्। तां त एतेनावयजे स्वाहा
॥ १४ ॥ प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा। चक्षुषेस्वाहा
श्रोत्राय स्वाहा। मनसे स्वाहा वाचे सरस्वत्यै स्वाहा ॥ १५ ॥ पूष्णे स्वाहा
पूष्णेशरसे स्वाहा। पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहा। पूष्णे
ऽङ्घृणये स्वाहा पूष्णे नरुणाय स्वाहा। पूष्णे सांकेताय स्वाहा ॥१६॥ उद्-
यशुष्माङ्गानुनर्तिबिभर्ति। भारं पृथिवी न भूमं। प्रशुक्रैतु देवी मनीषा।
अस्मत्सुतष्टो रथो न वाजी। अर्चतएके महिसाम मन्वत। तेन सूर्यमधारयन्।
तेन सूर्यमरोचयन्। घर्मः शिरस्तदयमग्निः। पुरीषमसि संप्रियं प्रजयापशुभि-

भुवत् । प्रजापतिस्त्वासादयतु । तया देवतयांगिरस्वध्रुवासीद ॥१७॥ यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः। यास्ते अग्न इंद्वो या उ नाभयः।यास्ते अग्ने तनुव ऊर्जोनाम । ताभिस्त्वमुभयीभिः संविदानः । प्रजाभिरग्ने द्रविणेह सीद । प्रजापतिस्त्वासादयतु । तयादेवतयांगिरस्व ध्रुवासीद ॥ १८ ॥ अग्निरसि वैश्वानरो सि । संवत्सरोसि परिवत्सरोसि । इदावत्सरोसीदुवत्सरोसि । इद्वत्सरोसि वत्सरोसि । तस्य ते वसंतः शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमंतो मध्यम् । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषम् । अहोरात्राणीष्टकाः । तस्य ते मासाश्चार्द्धमासाश्चकल्पन्ताम् । ऋतवस्ते कल्पन्ताम् । संवत्सरस्ते कल्पताम् । अहोरात्राणि ते कल्पंताम् । एतिप्रेतिवीति समित्यादिति । प्रजापतिस्त्वा सादायतु । तया देवतयांगिरस्व ध्रुवः सीद ॥ १९ ॥ भूर्भुवः सुवः ऊर्ध्व ऊ षु ण ऊतये । ऊर्ध्वोनः पाह्यंहसः । विधुं दद्राणश्समने बहूनाम् । युवानश् सन्तं पलितो जगार । देवस्य पश्य काव्यम् । महित्वा द्याममार । सद्यः समान । यहते चिदभिश्रिषः । पुरा जत्रुभ्य आतृदः । संधाता संधिं मघवा पुरोवसुः ॥१॥ निष्कर्ता विहुतं पुनः। पुनरूर्जासहरय्या । मानो घर्म व्यथितो विव्यथो नः । मानः परमधरं मारजो नैः । मोष्वस्माश्स्तमस्यंतराधाः । मारुद्रियासो अभिगूर्धानः । मानः क्रतुभिर्हिडितेभिरस्मान् । द्विषासुनीतेमापरादाः । मानो रुद्रो निर्ऋतिर्मानो अस्ता । मा द्यावापृथिवी हीडिषाताम् ॥ २ ॥ उपनो मित्रावरुणाविहावतम् । अन्वादीध्याथामिहनः सखाया । आदित्यानां प्रसितिर्हेतिः । उग्राशतापाष्ठाघविषापरि णोवणक्तु । इमं मे वरुणतत्त्वायामि । त्वन्नो अग्ने सत्वन्नो अग्ने । त्वमग्ने अयासि । उद्वयं तमसस्परि । उदुत्यं चित्रम् । वयः सुपर्णाः ।३॥

पुरोवसुर्हांडिषाताः सुपर्णाः ॥ २० ॥ भूर्भुवः सुवः । मयि त्यदिंद्रियं महत् । मयि दक्षो मयि क्रतुः । मयि धायि सुवीर्यम् । त्रिशुग्घमौं विभातुमे । आकूत्या मनसा सह । विराजा ज्योतिषा सह । यज्ञेन पयसा सह । ब्रह्मणा तेजसा सह । क्षत्रेण यशसा सह । सत्येन तपसा सह । तस्य दोहमशीमहि । तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि। तस्य त इंद्रेण पीतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि॥१॥ यशसा सहषट् च॥ २१ ॥यास्ते अग्ने घोरास्तनुवः । क्षुच तृष्णा च । अस्नुक्चानाहुतिश्च । अशनया च पिपासा च । सेदिश्चामतिश्च । एतास्ते अग्ने घोरास्तनुवः । ताभिरमुंगच्छ । यो स्मान्द्वेष्टि । यंच वयंद्विष्मः ॥ २२ ॥ स्निक्चस्नीहि तिश्च स्निहि तिश्च। उष्णाचशीताच । उग्राचभीमाच । सदान्नीसेदिरनिरा । एतास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ। योऽस्मान्द्वेष्टि । यंच वयं द्विष्मः ॥२३॥ धुनिश्च ध्वांतश्चध्वनश्चध्वनयश्च । निलिंपश्च विलिंपश्च विक्षिपः ॥ २४ ॥ उग्मश्च धुनिश्च ध्वांतश्च ध्वनश्च ध्वनयश्च । सहसह्वाश्च सहमानश्च सहस्वाश्च सहीयाश्च । एत्यप्रेत्यविक्षिपः ॥ २५ ॥ अहोरात्रे त्वोदीरयताम् । अर्धमासास्त्वोदीं जयंतु । मासास्त्वा श्रपयंतु । ऋतवस्त्वा पचंतु । संवत्सरस्त्वाहंत्वसौ ॥ २५ ॥ खट्फट्जहि । छिंधी भिंधी हुंधी कट् । इति वाचः क्रूराणि ॥ २७ ॥ विगा इंद्रविचरन्त्स्पाशयस्व । स्वपन्तमिन्द्रपशुमंतमिच्छ ।.वज्रेणामुं बोधयदुर्विदत्रम् । स्वपतोस्य प्रहर भोजनेभ्यः । अग्ने अग्निना संवदस्व । मृत्योमृत्युना संवदस्व । नमस्ते अस्तु भगवः। सकृत्ते अग्नेनमः। द्विस्ते नमः । त्रिस्ते नमः । चतुस्ते नमः । पंचकृत्वस्तेनमः। दशकृत्वस्तेनमः । शतकृत्वस्ते नमः।आसहस्रकृत्वस्ते नमः। अपरिमितकृत्वस्ते नमः। नमस्ते अस्तु

मामाहिंस्सीः ॥ १ ॥ त्रिस्ते नमः सप्तच ॥२८॥ असृङ्मुखोरुधिरेणाव्यक्तः । यमस्य दूतः श्वपाद्विधावसि । गृध्रः सुपर्णः कुणपन्निषेवसे । यमस्य दूतः प्रहितो भवस्य चोभयोः ॥ २९ ॥ यदेतद्वृकसो भूत्वा । वाग्देव्यभिरायसि । द्विषंतं मेऽभिरांय । तं मृत्यो मृत्यवेनय । सआर्त्यार्तिमार्च्छतु ॥३०॥यदीषितो यदि वा स्वकामी । भयेडको वदति वाचमेताम् । तामिंद्राग्नी ब्रह्मणा संविदानौ । शिवामस्मभ्यं कृणुतं गृहेषु ॥ ३१ ॥ दीर्घमुखि दुर्हणु । मास्मंदक्षिणतो वदः । यदि दक्षिणतो वदाद्द्विपंतमेव बाधासै ॥३२॥इत्थादुलूक आपप्तत् । हिरण्याक्षो अयोमुखः । रक्षसां दूत आगतः । तमितोनाशयाग्ने ॥३३ यदेतद्दूतान्यन्वाविश्य । दैवीं वाचं वदासि । द्विषतो नः परावद । तान्मृत्यो मृत्यवे नय । त आर्त्यार्तिमार्च्छतु । अग्निनाग्निःसंवदताम् ॥ ३४ ॥प्रसार्यसक्थ्यौ पतसि । सव्यमाक्षि निषेपि च । मेहकस्य च नाम मत् ॥ ३५ ॥ अत्रिणा त्वा क्रिमेहन्मि । कण्वेन जमदग्निना । विश्वावसोर्ब्रह्मणा हतः । क्रिमीणाꣳ राजा । अप्येषाꣳ स्थपतिर्हतः । अथो मातायो पिता । अथो स्थूरा अथोक्षुद्राः । अथो कृष्णा अथो श्वेताः । अथो आशातिकाहताः । श्वेताभिः सहसर्वे हताः ॥ ३६ ॥ आहरावद्य । शृतस्य हविषो यथा । तत्सत्यं यदमुं यमस्य जम्भयोः । आदधामि तथाहि तत् । खण् फण् स्रंसि ॥ ३७ ॥ ब्रह्मणा त्वाशपामि । ब्रह्मणस्त्वाशपथेन शपामि । घोरेणत्वा भृगूणांचक्षुषाप्रेक्षे । रौद्रेण त्वांगिरसां मनसा ध्यायामि । अघस्य त्वाधारयाविध्यामि । अधरोमत्पद्यस्वासौ ॥३८॥ उत्तुदाशिमिजावरि । तल्पेजे तल्प उत्तुद । गिरीꣳ रनुप्रवेशय । मरीचीरुपसन्तुद । यावदितः पुरस्तादुदयाति सूर्यः । तावदितोऽमुन्नाशय । योस्मान्द्वेष्टि । यंचं वयं द्विष्मः ॥३९॥ भूर्भुवः

सुवोभूर्भुवः। सुवोभूर्भुवः सुवः। भुवोद्धायि भुवोद्धायि भुवोद्धायि। नृम्णायि नृम्णं नृम्णायि नृम्णं नृम्णायि नृम्णम्। निधाय्योवायि निधाय्योवायि निधाय्यो वायि। एअस्मे अस्मे। सुवर्नज्योतीः ॥ ४० ॥ पृथिवीसमित्। तामग्निः समिंधे। साग्नि ꣳ समिंधे। तामह ꣳसमिंधे। सा मा समिद्धा। आयुषा तेजसा वर्चसा श्रिया। यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिता ꣳ स्वाहा। अंतरिक्ष ꣳ समित् ॥ १ ॥ तांवायुः समिंधे। सावायुꣳसमिन्धे। तामह ꣳ समिंधे। सा मासमिद्धा। आयुषा तेजसा। वर्च सा श्रिया। यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिन्ता ꣳ स्वाहा। द्यौः समित्। तामादित्यः समिंधे ॥ २ ॥ सादित्य ꣳ समिंधे। तामह ꣳ समिंधे। सा मा समिद्धा। आयुषा तेजसा। वर्चसा श्रिया। यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिंता ꣳ स्वाहा। प्राजापत्या मे समिदसि सपत्नक्षयणी। भ्रातृव्यहामोसि स्वाहा। अग्नेव्रतपते व्रतं चरिष्यामि ॥ ३ ॥ तच्छकेयं तन्मेराध्यताम्। वायोव्रतपतआदित्यव्रतपते। व्रतानां व्रतपते व्रतं चरिष्यामि। तच्छकेयं तन्मेराध्यताम्। द्यौः समित्। तामादित्यः समिंधे। सादित्य ꣳ समिंधे। तामाह ꣳ समिंधे। सामासमिद्धा। आयुषा तेजसा ॥४॥ वर्चसा श्रिया। यशसाब्रह्मवर्चसेन। अन्नाद्येनसमिंता ꣳ स्वाहा। अंतरिक्ष ꣳ सामित्। तां वायुः समिंधे। सा वायु ꣳ समिंधे। तामह ꣳ समिंधे। सामासमिद्धा। आयुषा तेजसा। वर्चसा श्रिया॥५॥ यशसा ब्रह्मवर्चसेन। अन्नाद्येन समिन्ता ꣳस्वाहा। पृथिवीसमित्। तामग्निः समिंधे। साग्नि ꣳ समिन्धे। तामह ꣳ समिन्धे। सामासमिद्धा। आयुषातेजसा। वर्चसाश्रिया। यशसा ब्रह्मवर्चसेन ॥ ६ ॥ अन्नाद्येन समिंता ꣳ स्वाहा। प्राजापत्यामे समिदसि सपत्नक्षयणी। भ्रातृव्यहा मोसि स्वाहा। आदित्यव्रतपतेव्रतमचारिषम्। तदशकं

तन्मेराधि। वायो व्रतपतेऽग्ने व्रतपते। व्रतानां व्रतपते व्रतमचारिषम्। तदशकं तन्मेराधि ॥ ४१ ॥ समित्समिन्धे व्रतं चरिष्यामि तेजसा श्रिया यशसा ब्रह्मवर्चसेनाष्टौ च ॥शन्नोवातः पवताम् मातरिश्वाशन्नस्तपतु सूर्यः। अहानि शं भवंतु नः शं रात्रिः प्रतिधीयताम्। शमुषा नो व्यच्छतु शमादित्य उदेतु नः। शिवा नः शंतमा भव सुमृडीका सरस्वति। मा ते व्योमसंदृशि। इडायै वास्त्वसि वासुमद्वास्तुमंतो भूयास्म स मा वास्तोश्छिस्म ह्यवास्तुः स भूयाद्यो-ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। प्रतिष्ठासि प्रतिष्ठावंतो भूयास्म मा प्रतिष्ठायाश्छित्स्म ह्यप्रतिष्ठः स भूयाद्यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। आ वात वाहि भेषजं विवात वाहि यद्रपः। त्वंहि विश्वभेषजो देवानां दूत ईयसे। द्वावि-मौ वातौ वात आसिंधोरापरावतः ॥ १ ॥ दक्षं मे अन्य आवातु परा-ऽन्योवातु यद्रपः। यददो वातते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे ततो नो धेहि भेषजम्। ततो नो मह आवह वात आवातु भेषजꣳशं मयोभूनो हृदे। प्रण आयूꣳषि तारिषत्। इंद्रस्य गृहोसि तं त्वा प्रपद्ये सगुः साश्वः। सहयन्मे अस्ति तेन। भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूभुवः सुवः प्रपद्ये वायुं प्रपद्येऽनार्तां देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्म-कोशं ब्रह्म प्रपद्य ओं प्रपद्ये। अंतरिक्षं म उर्वंतरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्ति मां तया स्वस्त्या स्वस्तिमानसानि। प्राणापानौ मृत्यो-र्मापातं प्राणापानौ मामा हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां मयिप्रजां मयि सूर्यो भ्राजो दधातु ॥ २ ॥ द्युभिरक्तुभिः परिपातमस्मानारिष्टेभिरश्विना सौभगेभिः। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः।

कयानश्चित्र आभुवदूती सदा वृधः सखा । कया शचिष्ठया वृता । कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढाचिदारुजे वसु । अभीषुणः सखीनामविता जरितॄणाम् । शतंभवास्यूतिभिः । वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधाऋषयो नाधमानाः । अपध्वांतमूर्णुहि पूर्धिचक्षुर्मुग्ध्यस्मान्निधयेव बद्धान् ॥ ३ ॥ शन्नो देवीरभिष्टय आपो भवंतु पीतये । शं योरभिस्रवंतु नः । ईशानावार्याणां क्षयंतीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रा न आप ओषधयः संतु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ॥ ४ ॥ आपो जनयथा च नः । पृथिवी शांता सान्तरिक्षं शांता सा मे शांता शुचꣳशमयतु । अंतरिक्षꣳ शांतं तद्वायुना शांतं तन्मे शांतꣳशुचꣳ शमयतु । द्यौः शांता सादित्येन शांता सा मे शांता शुचꣳशमयतु । पृथिवी शांतिरंतरिक्षꣳ शान्तिर्द्यौः शांतिर्दिशः शांतिरवांतरदिशाः शांतिरग्निः शांतिर्वायुः शांतिरादित्यः शांतिश्चन्द्रमाः शांतिर्नक्षत्राणि शांतिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्गौः शांतिरजा शांतिरश्वः शांतिः पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणः शांतिः शांतिरेव शांतिः शांतिर्मे अस्तु शांतिः । तया हꣳशांत्या सर्वशांत्या महं द्विपदे चतुष्पदे च शांतिं करोमि शांतिर्म अस्तु शांतिः । एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु मामाꣳश्रीश्च ह्रीश्चधृतिश्चतपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मामाहासिषुः । उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳअनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम

शरदः शतम् । जीवेम शरदः शतम् । नंदाम शरदः शतम् । मोदाम शरदःशतम् । भवाम शरदः शतꣳ शृणवाम शरदः शतम् । प्रब्रवाम शरदः शतमजीताः स्याम शरदःशतम् ज्योक्च सूर्यं दृशे । य उद्गान्महतोर्णवाद्विभ्राजमानः सरिरस्य मध्यात्समा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु । ब्रह्मणश्चोर्त्वन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदंतरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यद्दहं वेद तद्दहं धारयाणि मामद्वेदोधि विस्रंसत् । मेधामनीषे मा विशताꣳ समीची भूतस्य भव्यस्यावरुद्ध्यै सर्वमायुरयाणि सर्वमायुरयाणि । आभिर्गीर्भिर्यदतो न ऊनं माप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अधते स्याम । ब्रह्म प्रावादिष्म तन्नो माहासीत् । ॐ शांतिः शांतिः शांतिः ॥ ५ ॥ परावतो दधातु बद्धां जिन्वथ दृशे सप्तयं ॥ ४२ ॥ नमो युंजते वृष्णो अश्वस्य ब्रह्मन्प्रवर्ग्येण ब्रह्मन्प्रचरिष्यामो दश प्राचीरपश्यं गोपां देवस्य समुद्रायेषेपीपिहि धर्म यातेः महीनां चत्वार्यस्कान्यापुरस्तात्सप्त सप्त प्राणाय त्रीणि पूष्णे चत्वार्युदस्यैकादश यास्ते सप्ताग्निर्ध्रुवा सीदैकोनाविꣳशतिर्भूरूर्ध्वास्त्रिꣳशद्भिर्मायि षोडश यास्तेघोरा नवस्निक्चाष्टौ धुनिश्च द्वे उग्रश्च त्रीण्यहोरात्रे पंच खट् त्रीणि विगाःसप्तदशासृङ्मुखश्चत्वारि यदेतद्वृकसः पंचयदीषितश्चत्वारिदीर्घमुखित्रीणीत्याचत्वारि यदेतद्भूतानि षट्प्रसार्य त्रीण्यत्रिणा दशाहरावद्य ब्रह्मणा षट्षडुत्तुदाष्टौ भूर्भुवः षट् पृथिव्यष्टषष्टिः शन्नः सप्त पंचाशद्द्विचत्वारिꣳशत् ॥ ४२ ॥ नमो युंजते ब्रह्मन्प्रचरिष्यामोऽपश्यंगोपाꣳसमुद्राय वयमनुकामामपूष्णे धुनिश्च यदेतद्भूतानि तच्छकेयमष्टाशीतिः ॥ ८८ ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे

नमो॑ वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामृषयो मन्त्रकृतो॑ मन्त्रपतयः परादुर्मोऽहमृषी॑न्मन्त्रकृतो॑ मन्त्रपतीन्परा॑दां वैश्वदेवीं वाचमुद्यासꣳ शिवामद॑स्तां जुष्टां देवेभ्यः शर्म॑ मे द्यौः शर्म॑ पृथिवी शर्म॑ विश्वमिदं जगत् । शर्म॑ चन्द्रश्च सूर्यश्च शर्म॑ ब्रह्मप्रजापती । भूतं व॑दिष्ये भुवनं व॑दिष्ये तेजो॑ व॑दिष्ये यशो॑ व॑दिष्ये तपो॑ व॑दिष्ये ब्रह्म व॑दिष्ये सत्यं व॑दिष्ये तन्मा अहमि॑ दमुपस्तर॑णमुपस्तृण उपस्तर॑णं मे प्रजायै॑ पशूनां भूयादुपस्तर॑णमहं प्रजायै॑ पशूनां भूयासं प्राणापानौ मृत्योर्मा॑ पातं प्राणापानौ मा मा॑ हासिष्टं मधु म॑निष्ये मधु ज॑निष्ये मधु वक्ष्यामि मधु व॑दिष्यामि मधुमतीं देवेभ्यो वाचमु॑द्यासꣳशुश्रूषेण्यां मनुष्येभ्य॑स्तं मा॑ देवा अवन्तु शोभायै॑ पितरोऽनुमदन्तु ॐ शान्तिः॒ शान्तिः॒ शान्ति॑ः ॥ हरिः॑ ॐ ॥ हरिः॑ ॐ ॥ शन्नस्तन्नो माहा॑सीत् । ॐ शां॑तिः शां॑ति शां॑ति॑ः ॥ हरिः॑ ॐ ॥ देवा॑ वै सत्रमा॑सत । ऋद्धिं॑परिमितं यशस्कामाः । ते॑ऽब्रुवन् । यन्नः॑ प्रथमं यश॑ऋच्छात् । सर्वेषान्नस्तत्सहा॑सादिति॑ तेषां॑ कुरुक्षेत्रं वेदि॑रासीत् । तस्यै॑ खां॑डवो दक्षिणार्द्ध आ॑सीत् । तूर्ण्मुत्तरार्द्धः । प्रवी॑णज॑घनार्द्धः ॥ मरवं॑ उत्करः ॥ १ ॥ तेषां॑ मखं वैष्णवं यश॑ आर्च्छत् । तद्य॑कामयत । तेनाप॑क्रामत् । तं॑ देवा अन्वा॑यन् । यशो॑वरुरुत्समानाः । तस्यान्वा॑गतस्य । सव्याद्व॑नुरजा॑यत । दक्षिणा॑दिषवः । तस्मा॑दिषुधन्वं॑पुण्यं जन्म । यन्नज॑न्मा हि ॥ २ ॥ तमेकꣳसं॑तम् । बहवो नाभ्य॑धृष्णुवन् । तस्मा॑देकमिषुधन्विनं॑म् । बहवो॑ निषु॑धन्वानाभिधृ॑ष्णुवा॑ति । सोऽम्यत । एकं॑मासन्तं वहवोनाभ्यधर्षिषुरिति॑ । तस्यासि॑ष्मियाणस्य तेजोऽप॑क्रामत् । तद्देवा ओष॑धीषु न्य॑मृजुः । तेऽश्यामाकाः॑ अभवन् । श्मयाकावै नामै॑ते ॥ ३ ॥ तत्स्म॑याकानाꣳस्मयाकत्वम् । तस्मा॑द्दीक्षि॑तेनापि॑गृह्यꣳस्मेतव्यम् । तेज॑सो धृत्यै॑ । स

धनुः प्रतिष्कभ्यातिष्ठत् । ता उपदीका अब्रुवन्वरं वृणामहै । अथ व इमꣳ रन्धयाम । यत्र कंच खनाम । तदपो भिनृणदामेति । तस्मादुपदीकायत्र कंच खनंति । तदपो भिनत्ति ॥४॥ वारे वृत्रꣳ ह्यासां तस्यज्यामप्यादन् । तस्य धनुर्विप्रवर्माणꣳ शिर उदवर्तयत् । तद्द्यावापृथिवी अनुप्रावर्तत । यत्प्रावर्तत । तत्प्रवर्ग्यस्य प्रवर्ग्यत्वम् । यद्द्यां ३ इत्यपतत् । तद्धर्मस्य धर्मत्वम् । महतोवीर्यस्य पप्रादिति । तन्महावीरस्य महावीरत्वम् ॥ ५ ॥ यदस्याः समभरन् । तत्सम्राजः सम्राट्त्वम् । तꣳ स्तृतंदेवतास्वेधाव्यगृह्णत । अग्निः प्रातः सवनम् । इंद्रो माध्यंदिनꣳ सवनम् । विश्वे देवास्तृतीयसवनम् । तेनापशीर्ष्णायज्ञेन यजमानाः । नाशिषोवारुन्धत । न सुवर्गं लोकमभ्यजयन् । तेदेवाअश्विनावब्रुवन् ॥ ६ ॥ भिषजौ वै स्थः । इदंयज्ञस्यशिरः प्रति धत्तमिति । तावब्रूतां वरं वृणावहै । अहं एवनावत्रापि गृह्यतामिति । ताभ्यामेतमाश्विनमगृह्णन् । तावेतद्यज्ञस्य शिरः प्रत्यधत्ताम् । यत्प्रवर्ग्यः । तेन सशीर्ष्णायज्ञेनयजमानाः । अवाशिषोरुन्धत । अभिसुवर्गंलोकमजयन् । यत्प्रवर्ग्यं प्रवृणक्ति । यज्ञस्यैव तच्छिरः प्रति दधाति । तेन सशीर्ष्णा यज्ञेन यजमानः । अवाशिषो रुंधे । अभिसुवर्गंलोकं जयति । तस्मादेष आश्विनप्रवया इव । यत्प्रवर्ग्यः ॥ ७ ॥ उत्करोह्यते तृंदंतिमहावीरत्वमब्रुवन्नजयन्त्सप्तच ॥ १ ॥ सावित्रं जुहोति प्रसूत्यै । चतुर्गृहीतेन जुहोति । चतुष्पादः पशवः । पशूनेवावरुंधे । चतस्रो दिशः । दिक्ष्वेव प्रतितिष्ठति । छन्दाꣳसि देवेभ्योपाक्रामन् । नवो भागानि हव्यं वक्ष्याम इति । तेभ्य एतच्चतुर्गृहीतमधारयन् । पुरोनुवाक्यायै याज्यायै ॥ १ ॥ देवतायै वषट्काराय । यच्चतुर्गृहीतं जुहोति । छंदाꣳस्येव तत्प्रीणाति । तान्यस्य प्रीणाति देवेभ्यो हव्यं वहंति । ब्रह्मवादिनो वदन्ति ।

होतव्यं दीक्षितस्य गृहा ३ इ न होतव्या ३ मिति। हविर्वैदीक्षितः। यज्जुहुयात्। हविष्कृतं यजमानमग्नौ प्रदध्यात्। यन्न जुहुयात्॥ २॥ यज्ञपरुरन्तरियात्। यजुरेव वदेत्। न हविष्कृतं यजमानमग्नौ प्रदधाति। न यज्ञपरुरंतेरति। गायत्री छंदाश्स्यर्यमन्यत। तस्यै वषट्कारोभ्यय्य शिरोच्छिनत्। तस्यै द्वेधा रसः परापतत्। पृथिवीमधः प्राविशत्। पशून्द्यौः। यः पृथिवीं प्राविशत्॥ ३॥ स खदिरोऽभवत्। यः पशून्। सोऽजाम्। यत्खादिर्याभ्रिर्भवति। छंदसामेव रसेन यज्ञस्य शिरः संभरति। यदौदुंबरी। ऊर्वावुदुंबरः। ऊर्जैव यज्ञस्य शिरः संभरति। यद्वैणवी। तेजो वै वेणुः॥ ४॥ तेजसैव यज्ञस्य शिरः संभरति। यद्वैकङ्कती। भा एवावरुंधे। देवस्य त्वा सवितुः प्रसवइत्यभ्रिमादत्ते प्रसूत्यै। अश्विनोर्बाहुभ्यामित्याह। अश्विनौहि देवानामध्वर्यू आस्ताम्। पूष्णोहस्ताभ्यामित्याह यत्यै। वज्र इव वा एषा। यदभ्रिः। अभ्रिरसि नारिरसीत्याह शांत्यै॥ ५॥ अध्वरकृद्देवेभ्य इत्याह। यज्ञो वा अध्वरः। यज्ञकृद्देवेभ्य इति वा वैतदाह। उत्तिष्ठ ब्रह्मणस्पत इत्याह। ब्रह्मणैव यज्ञस्य शिरोऽच्छैति। प्रैतु ब्रह्मणस्पतिरित्याह। प्रेत्यैव यज्ञस्य शिरोऽच्छैति। प्रदेव्येतु सूनृतेत्याह। यज्ञो वै सूनृता। अच्छावीरं नर्यं पङ्क्तिराधसमित्याह॥ ६॥ पाङ्क्तो हि यज्ञः। देवा यज्ञं नयंतु न इत्याह। देवानेव यज्ञनियः कुरुते। देवी द्यावापृथिवी अनु मे मंस्साथामित्याह। आभ्यामेवानुमतो यज्ञस्य शिरः संभरति। ऋध्यासमद्य मखस्य शिरइत्याह। यज्ञो वै मखः। ऋध्यासमद्य यज्ञस्य शिर इति वावैतदाह। मखाय त्वा मखस्य त्वा शीर्ष्णइत्याह। निर्दिश्यैवैनद्धरति॥ ७॥ त्रिर्हरति। त्रय इमे लोकाः। एभ्य एव लोकेभ्यो यज्ञस्य शिरः संभरति। तूष्णीं चतुर्थꣳ हरति। अपरिमितादेव यज्ञस्य शिरः संभ-

रति । मृत्खनादग्रे हरति । तस्मान्मृत्खनः करुण्यतमः । इयत्यग्र आसीरित्याह । अस्यामेवार्छं वष्कारं यज्ञस्य शिरः संभरति । ऊर्जं वा एतꣳ रसं पृथिव्या उपदीका उद्धरति ॥ ८ ॥ यद्वल्मीकम् । यद्वल्मीकवपासंभारो भवति । ऊर्जमेव रसं पृथिव्या अवरुंधे । अथो श्रोत्रमेव । श्रोत्रꣳ ह्येतत्पृथिव्याः । यद्वल्मीकः । अधिरो भवति । य एवं वेद । इन्द्रो वृत्राय वज्रमुदयच्छत् । स यत्र यत्र पराक्रमत ॥ ९ ॥ तन्नाश्रियत । स पूतीकस्तंबे पराक्रमत । सोऽश्रियत । सोऽब्रवीत् । ऊतिं वै मे धा इति । तदूतीकानामूतीकत्वम् । यदूतीका भवंति । यज्ञायैवोतिं दधति । अग्निजा असि प्रजापते रेत इत्याह । य एव रसः पशून्प्राविशत् ॥ १० ॥ तमेवावरुंधे । पंचैते संभारा भवंति । पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरः संभरति । यद्ग्राम्याणां पशूनां चर्मणा संभरेत् । ग्राम्यान्पशूंछुचार्पयेत् । कृष्णाजिनेन संभरति । आरण्यानेव पशूंछुचार्पयति । तस्मात्समावत्पशूनां प्रजायमानानाम् ॥ ११ ॥ आरण्याः पशवः कनीयाꣳसः । शुचाह्यृताः । लोमतः संभरति । अतो ह्यस्य मेध्यम् । परिगृह्याऽऽयति । रक्षसामपहत्यै । बहवो हरंति । अपचितिमेवास्मिन् दधति । उद्धते सिकतोपोप्ते परिश्रितेनि दधति शांत्यै । मदन्तीभिरुपसृजति ॥ १२ ॥ तेज एवास्मिन्दधाति । मधु त्वा मधुला करोत्वित्याह । ब्रह्मणैवास्मिन्तेजो दधाति । यद्ग्राम्याणां पात्राणां कपालैः सꣳसृजेत् । ग्राम्याणि पात्राणि शुचार्पयेत् । अमकपालैः सꣳसृजति । एतानि वा अनुपजीवनीयानि । तान्येव शुचार्पयति ॥ शर्कराभिः सꣳसृजति धृत्यै । अथो शंत्वाय । अजलोमैः सꣳसृजति । एषा वा अग्नेः प्रिया तनूः । यदजा । प्रिययैवैनं तनुवा सꣳसृजति । अथो तेजसा । कृष्णाजिनस्य लोमभिः सꣳसृजति । यज्ञो वै कृष्णाजिनम् । यज्ञे-

नैव यज्ञꣳसꣳसृजति ॥ १३ ॥ याज्यायै न जुहुयादविशद्वेणुः शांत्यै पंक्तिराधꣳसमित्याह हरति दिहंति पराक्रमताऽविशत्प्रजायमानानाꣳसृजति शंत्वायाष्टौच ॥ २ ॥ परिश्रिते करोति । ब्रह्मवर्चसस्य परिगृहीत्यै । न कुर्वन्नभिप्राण्यात् । यत्कुर्वन्नभिप्राण्यात् । प्राणाञ्छुचार्पयेत् । अपहाय प्राणिति । प्राणानां गोपीथाय । न प्रवर्ग्यं चादित्यं चांतरेयात् । यदंतरेयात् । दुश्चर्मा स्यात् ॥ १ ॥ तस्मान्नान्तराय्यम् । आत्मनो गोपीथाय । वेणुना करोति । तेजो वै वेणुः । तेजः प्रवर्ग्यः । तेजसैव तेजः समर्धयति । मखस्य शिरोसीत्याह । यज्ञो वै मखः । तस्यैतच्छिरः । यत्प्रवर्ग्यः ॥ २ ॥ तस्मादेवमाह । यज्ञस्य पदे स्थ इत्याह । यज्ञस्य ह्येते पदे । अथो प्रतिष्ठित्यै । गायत्रेण त्वा छंदसा करोमीत्याह । छंदोभिरेवैनं करोति । व्यृद्धि करोति । त्रय इमे लोकाः । एषां लोकानामप्त्यै । छंदोभिः करोति ॥ ३ ॥ वीर्यं वै छंदाꣳसि । वीर्यमेवैनं करोति । यजुषा बिलं करोति व्यावृत्यै । इयंन्तं करोति । प्रजापतिना यज्ञमुखेन संमितम् । इयंतं करोति । यज्ञपरुषा सम्मितम् । इयंतं करोति । एतावद्वै पुरुषवीर्यम् । वीर्यसंमितम् ॥ ४ ॥ अपरिमितं करोति । अपरिमितस्यावरुध्यै । परिग्रीवं करोति धृत्यै । सूर्यस्य हरसा श्रायेत्याह । यथा यजुरेवैतत् । अश्वशकेन धूपयति । प्राजापत्यो वा अश्वः सयोनित्वाय । वृष्णो अश्वस्य निष्पदसीत्याह । असौ वा आदित्यो वृषाश्वः । तस्य छंदाꣳसि निष्पत् ॥ ५ ॥ छंदोभिरेवैनं धूपयति । अर्चिषे त्वा शोचिषेत्वेत्याह । तेज एवास्मिन्दधाति । वारुणोभीद्धः । मैत्रियोपैति शांत्यै । सिध्यै त्वेत्याह । यथा यजुरेवैतत् । देवस्त्वा सवितोद्वपत्वित्याह । सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरुद्वपति । अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह ॥ ६ ॥

तस्मादग्निः सर्वा दिशोनुविभाति । उत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै । ईश्वरो वा एषोऽन्धो भवितोः । यः प्रवर्ग्यमन्वीक्षते । सूर्यस्य त्वा चक्षुषान्वीक्ष इत्याह । चक्षुषो गोपीथाय । ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह । इयं वा ऋजुः । अंतरिक्षꣳ साधु । असौ सुक्षितिः ॥ ७॥ दिशो भूतिः । इमानेवास्मै लोकान्कल्पयति । अथो प्रतिष्ठित्यै । इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीत्याह । विशैवैनं पशुभिर्ब्रह्मवर्चसेन पर्यूहति । विशेति राजन्यस्य ब्रूयात् । विशै वैनं पर्यूहति । पशुभिरिति वैश्यस्य । पशुभिरेवैनं पर्यूहति । असुर्यपात्रमनाच्छृण्णम् ॥८॥ आच्छृणत्ति । देवत्राऽकः । अजक्षीरेणाऽऽच्छृणत्ति । परमं वा एतत्पयः । यदजक्षीरम् । परमेणैवैनं पयसाऽऽच्छृणत्ति । यजुषा व्यावृत्यै । छंदोभिराच्छृणत्ति । छंदोभिर्वा एष क्रियते । छंदोभिरेव छंदाꣳस्याच्छृणत्ति । छृंधि वाचमित्याह । वाचमेवावरुंधे । छृंध्यूर्जमित्याह । ऊर्जमेवावरुंधे । छृंधि हविरित्याह । हविरेवाकः । देव पुरश्चर सव्यास त्वेत्याह । यथायजुरेवैतत् ॥ ९ ॥ स्याद्यत्प्रवर्ग्यꣳछंदोभिः करोति वीर्यं संमितं छंदाꣳसि निष्पत्पृणेत्याह सुक्षितिरनाच्छृण्णं छंदाꣳस्याच्छृणत्यष्टौ च ॥ ३ ॥ ब्रह्मन्प्रचरिष्यामो होतर्धर्ममभिष्टुहीत्याह । एष वा एतर्हि बृहस्पतिः । यद्ब्रह्मा । तस्मा एव प्रतिप्रोच्य प्रचरति । आत्मनोऽनार्त्यै । यमाय त्वा मखाय त्वेत्याह । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति । मदंतीभिः प्रोक्षति । तेज एवास्मिन् दधाति ॥ १ ॥ अभिपूर्वं प्रोक्षति । अभिपूर्वमेवास्मिंस्तेजो दधाति । त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । होताऽन्वाह । ऋक्सामपदृत्यै । अनवानम् । प्राणानाꣳसंतत्यै । त्रिष्टुभः सतीर्गायत्रीरिवान्वाह ॥ २ ॥ गायत्रो हि प्राणः । प्राणमेव

यजमाने दधाति। संततमन्वाह। प्राणानामन्नाद्यस्य संतत्यै। अथो रक्षसामपहत्यै। यत्परिमिता अनुब्रूयात्। परिमितमवरुंधीत। अपरिमिता अन्वाह। अपरिमितस्यावरुध्यै। शिरो वा एतद्यज्ञस्य॥३॥ यत्प्रवर्ग्यः। ऊर्ङ्मुखाः। यन्मौजो वेदो भवति। ऊर्जैव यज्ञस्य शिरः समर्द्धयति। प्राणाहुतीर्जुहोति। प्राणानेव यजमाने दधाति। सप्त जुहोति। सप्त वै शीर्षण्याः प्राणाः। प्राणानेवास्मिन् दधाति। देवस्त्वा सविता मध्वानक्त्वित्यन्वाह॥४॥ तेजसैवैनमनक्ति। पृथिवीं तपसन्नायस्वेति हिरण्यमुपास्यति। अस्या अनतिदाहाय। शिरो वा एतद्यज्ञस्य। यत्प्रवर्ग्यः। अग्निः सर्वा देवताः। प्रलवानादीप्योपास्यति। देवतास्वेव यज्ञस्य शिरः प्रतिदधाति। अप्रतिशीर्णाग्रं भवति। एतद्वै हिरण्यम्॥५॥ अचिरसिशोचिरसीत्याह। तेज एवास्मिन्ब्रह्मवर्चसं दधाति। सꣳसीदस्व महाꣳ असीत्याह। महान् ह्येषः। ब्रह्मवादिनो वदंति। एते वाव त ऋत्विजः। ये दर्शपूर्णमासयोः। अथ कथा होता यजमानायाशिषो नाशास्त इति। पुरस्तादाशीः खलु वा अन्यो यज्ञः। उपरिष्टादाशीरन्यः॥६॥ अनाधृष्या पुरस्तादितियदेतानि यजूꣳष्याह। शीर्षत एव यज्ञस्य यजमान आशिषोवरुंधे। आयुः पुरस्तादाह। प्रजां दक्षिणतः। प्राणं पश्चात्। श्रोत्रमुत्तरतः। विधृतिमुपरिष्टात्। प्राणानेवास्मै समीचो दधाति। ईश्वरो वा एष दिशोनून्मादितोः। यं दिशोनुव्यास्थापयंति॥७॥ मनोरश्वासि भूरिपुत्रेतीमामभिमृशति। इयं वै मनोरश्वा भूरिपुत्रा। अस्यामेव प्रतितिष्ठत्यनुन्मादाय। सूपसदा मे भूया मामाहिꣳसीरित्याहाहिꣳसायै। चितःस्थ परिचित इत्याह। अपचितिमेवास्मिन् दधाति। शिरो वा एतद्यज्ञस्य। यत्प्रवर्ग्यः। असौ खलु वा आदित्यः प्रवर्ग्यः। तस्य मरुतो रश्मयः॥८॥

स्वाहा मरुद्भिः परिश्रयस्वेत्याह । अमुमेवादित्यꣳरश्मिभिः पर्यूहति । तस्मादसावादित्योमुष्मिंल्लोके रश्मिभिः पर्यूढः । तस्माद्राजा विशापर्यूढः । तस्माद्ब्राह्मणैः संजातैः पर्यूढः । अग्नेः सृष्टस्य यतः । विकंकतं भा आच्छत् । यद्वैकंकताः परिधयो भवंति । भा एवावरुन्धे । द्वादश भवंति ॥ ९ ॥ द्वादशमासाः संवत्सरः । संवत्सरमेवावरुंधे । अस्ति त्रयोदशो मास इत्याहुः । यत्त्रयोदशः परिधिर्भवति । तेनैव त्रयोदशं मासमवरुंधे । अंतरिक्षस्यांतर्द्धिरसीत्याह व्यावृत्यै । दिवं तपसस्पायस्वेत्युपरिष्टाद्धिरण्यमधि निदधाति । अमुष्या अनंतिदाहाय । अथो आभ्यामेवैनमुभयतः परिगृह्णाति । अर्हन्बिभर्षि सायकानि धन्वेत्याह ॥ १० ॥ स्तौत्येवैनमेतत् । गायत्रमसि त्रैष्टुभमसि जागतमसीति पवित्राण्यादत्ते । छन्दोभिरेवैनान्यादत्ते । मधुमधिवति धूनोति । प्राणो वै मधु । प्राणमेव यजमाने दधाति । त्रिः परियंति । त्रिवृद्धि प्राणः । त्रिः परियंति । त्र्यावृद्धि यज्ञः ॥ ११ ॥ अथो रक्षसामपहत्यै । त्रिः पुनः परियंति । षट्संपद्यंते । षड्वा ऋतवः । ऋतुष्वेव प्रतितिष्ठंति । यो वै धर्मस्य प्रियां तनुवमाक्रामति । दुश्चर्मा वै स भवति । एष ह वा अस्य प्रियां तनुवमाक्रामति । यस्त्रिः परीत्य चतुर्थं पर्येति । एताꣳह वा अस्योग्रदेवो राजानिराचक्राम ॥ १२ ॥ ततो वै स दुश्चर्माभवत् । तस्मात्त्रिः परीत्य न चतुर्थं परीयात् । आत्मनो गोपीथाय । प्राणा वै पवित्राणि । अव्यतिषंगं धून्वंति । प्राणानामव्यतिषंगाय कृत्यै । विनिषद्य धून्वंति । दिक्ष्वेव प्रतितिष्ठंति । ऊर्ध्वं धून्वंति । सुवर्गस्य लोकस्य समष्ट्यै । सर्वतो धून्वंति । तस्मादयꣳसर्वतः पवते ॥ १३ ॥ दधातीवान्वाह यज्ञस्याहैष उपरिष्टादाशीरन्यो व्यास्थापयंति ब्रह्मणो भवंति धन्वेत्याह यज्ञश्चक्राम समष्ट्यै च ॥ ४ ॥ अग्निष्वा वसुभिः

पुरस्ताद्रोचयतु गायत्रेण छंदसेत्याह । अग्निरेवैनं वसुभिः पुरस्ताद्रोचयति गायत्रेण छंदसा । स मां रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । इंद्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छंदसेत्याह । इंद्र एवैनꣳ रुद्रैर्दक्षिणतोरोचयति त्रैष्टुभेन छंदसा । स मां रुचितोरोचयेत्याह ॥ आशिषमेवैतामाशास्ते । वरुणस्त्वाऽऽदित्यैः पश्चाद्रोचयतु जागतेन छंदसेत्याह । वरुण एवैनमादित्यैः पश्चाद्रोचयति जागतेन छन्दसा ॥ १ ॥ स मां रुचितोरोचयेत्याह । आशिषमेवैतामाशास्ते । द्युतानस्त्वामारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसेत्याह । द्युतान एवैनं मारुतो मरुद्भिरुत्तरतो रोचयत्यानुष्टुभेन छन्दसा । स मां रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसेत्याह । बृहस्पतिरेवैनं विश्वैर्देवैरुपरिष्टाद्रोचयति पाङ्क्तेन छन्दसा । स मां रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ॥ २ ॥ रोचितस्त्वं देव घर्म देवेष्वसीत्याह । रोचितो ह्येष देवेषु । रोचिषीयाहं मनुष्येष्वित्याह । रोचत एवैष मनुष्येषु । सम्राड् घर्मरुचितस्त्वं देवेष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चस्यसीत्याह । रुचितो ह्येष देवेष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चसी । रुचितोहं मनुष्येष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह । रुचित एवैष मनुष्येष्वायुष्मान्स्तेजस्वी ब्रह्मवर्चसी भवति । रुगसि रुचं मयि धेहि मयि रुगित्याह । आशिषमेवैतामाशास्ते । तं यदेतैर्यजुर्भी रोचयित्वा । रुचितो घर्म इति ब्रूयात् । अरोचुको ऽध्वर्युः स्यात् । अरोचुको यजमानः । अथ यदेनमेतैर्यजुर्भी रोचयित्वा । रुचितो घर्म इति ब्राह । रोचुकोध्वर्युर्भवति । रोचुको यजमानः ॥ ३ ॥ पश्चाद्रोचयति जागतेन छन्दसा स मां रुचितो रोचयेत्याहाऽऽशिषमेवैतामाशास्ते शास्तेष्टौ च ॥ ५ ॥ शिरो वा एत-

यज्ञस्य । यत्प्रवर्ग्यः । ग्रीवा उपसदः । पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति । ग्रीवास्वेव यज्ञस्य शिरः प्रतिदधाति । त्रिः प्रवृणक्ति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो यज्ञस्य शिरोऽवरुंधे । षट् संपद्यंते । षड्वा ऋतवः ॥१॥ ऋतुभ्य एव यज्ञस्य शिरोऽवरुंधे । द्वादशकृत्वः प्रवृणक्ति । द्वादशमासाः संवत्सरः । संवत्सरादेव यज्ञस्य शिरोऽवरुंधे । चतुर्विंशतिः संपद्यंते । चतुर्विंशतिरर्धमासाः । अर्धमासेभ्य एव यज्ञस्य शिरोऽवरुंधे । अथो खलु । सकृदेव प्रवृज्यः । एकं हि शिरः ॥ २ ॥ अग्निष्टोमे प्रवृणक्ति । एतावान्वै यज्ञः । यावानग्निष्टोमः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति । नोक्थ्ये प्रवृंज्यात् । प्रजा वै पशव उक्थानि । यदुक्थ्ये प्रवृंज्यात् । प्रजां पशूनस्य निर्दहेत् । विश्वजिति सर्वपृष्ठे प्रवृणक्ति ॥ ३ ॥ पृष्ठानि वा अच्युतं च्यावयंति । पृष्ठैरेवास्मा अच्युतं च्यावयित्वाऽवरुंधे । अपश्यं गोपामित्याह । प्राणो वै गोपाः । प्राणमेव प्रजासु वियंतयति । अपश्यं गोपामित्याह । असौ वा आदित्यो गोपाः । स हीमाः प्रजा गोपायति । तमेव प्रजानां गोप्तारं कुरुते । अनिपद्यमानमित्याह ॥ ४ ॥ नह्येष निपद्यते । आ च परा च पथिभिश्चरंतमित्याह । आ च ह्येष परा च पथिभिश्चरति । स सध्रीचीः स विषूचीर्वसान इत्याह । सध्रीचीश्च ह्येष विषूचीश्च वसानः प्रजा अभिविपश्यति । आवरीवर्ति भुवनेष्वन्तरित्याह । आह्येषवरीवर्ति भुवनेष्वंतः । अत्र प्रावीर्मधुमाध्वीभ्यां मधुमाधूचीभ्यामित्याह । वासंतिकावेवास्मा ऋतू कल्पयति । समग्निरग्निना गतेत्याह ॥ ५ ॥ ग्रैष्मावेवास्मा ऋतू कल्पयति । समग्निरग्निनागतेत्याह । अग्निर्ह वै देवानामग्निना संगच्छते । स्वाहा समग्निस्तपसागतेत्याह । पूर्वमेवोदितम् । इत्तरेणाभिगृणाति । धर्ता दिवो विभासि रजसः पृथिव्या

इत्याह । वार्षिकावेवास्मा ऋतू कल्पयति । हृदे त्वा मनसे त्वेत्याह । शारदावेवास्मा ऋतू कल्पयति ॥ ६ ॥ दिवि देवेषु होत्रा यच्छेत्याह । होत्राभिरेवेमाँल्लोकान्त्संदधाति । विश्वासां भुवां पत इत्याह । हैमन्तिका वेवास्मा ऋतू कल्पयति । देवश्रूस्त्वं देवघर्म देवान्पाहीत्याह । शैशिरा वेवास्मा ऋतू कल्पयति । तपोजां वाचमस्मे नियच्छ देवायुवमित्याह । या वै मेध्या वाक् । सा तपोजाः । तामेवावरुंधे ॥ ७ ॥ गर्भो देवानामित्याह । गर्भो ह्येष देवानाम् । पिता मतीनामित्याह । प्रजा वै मतयः । तासामेष एव पिता । यत्प्रवर्ग्यः । तस्माद्देवमाह । पतिः प्रजानामित्याह । पतिर्ह्येष प्रजानाम् । मतिः कवीनामित्याह ॥ ८ ॥ मतिर्ह्येष कवीनाम् । संदेवो देवेन सवित्राऽऽर्यतिष्ट सꣳसूर्येणारुक्तेत्याह । अमुं चैवादित्यं प्रवर्ग्यं च सꣳशास्ति । आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असीत्याह । आशिषमेवैतामाशास्ते । पिता नोसि पिता नो बोधेत्याह । बोधयत्येवैनम् । नवैतेऽवकाशा भवंति । पञ्चैते दशमः । नव वै पुरुषे प्राणाः ॥ ९ ॥ नाभिर्दशमी । प्राणानेव यजमाने दधाति । अथो दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुंधे । यज्ञस्य शिरोऽच्छिद्यत । तदेवा होत्राभिः प्रत्यदधुः । ऋत्विजोऽवेक्षंते । एता वै होत्राः । होत्राभिरेव यज्ञस्य शिरः प्रति दधाति ॥ १० ॥ रुचितमवेक्षंते । रुचिताद्वै प्रजापतिः प्रजा असृजत । प्रजानाꣳ सृष्ट्यै । रुचितमवेक्षंते । रुचिताद्वै पर्जन्यो वर्षति । वर्षुकः पर्जन्योभवति । संप्रजा एधंते । रुचितमवेक्षन्ते । रुचितं वै ब्रह्मवर्चसम् । ब्रह्मवर्चसिनो भवंति ॥ ११ ॥ अधीयतोऽवेक्षंते । सर्वमायुर्यंति । न पत्न्यवेक्षेत । यत्पत्न्यवेक्षेत । प्रजायेत । प्रजांवस्यैनिं दहेत् । यन्नावेक्षेत । न प्रजायेत । नास्यै प्रजां निंदहेत् । तिरस्कृत्य यजुर्वाचयति । प्रजायते । नास्यै

प्रजां निर्दहति । त्वाष्टीमती ते सपेयेत्याह । सपाद्धि प्रजाः प्रजायंते ॥ १२ ॥ ऋतवो हि शिरः संवर्पृष्ठे प्रवृणक्त्यनिपद्यमानामित्याह गतेत्याह शारदावेवास्मा ऋतूंकल्पयति रुंधे कवीनामित्याह प्राणाः प्रतिदधाति भवंति वाचयति चत्वारि च ॥ ६ ॥ देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । आश्विनोहि देवानामध्वर्यू आस्तां पूष्णोहस्ताभ्यामित्याह यज्यै । आददेदित्यै रास्नासीत्याह यजुष्कृत्यै । इड एह्यदितं एहि सरस्वत्येहीत्याह । एतानि वा अस्यै देवनामानि । देवनामैरेवैनामाह्वयति । असावेह्यसावेह्यसावेहीत्याह । एतानि वा अस्यै मनुष्यनामानि ॥१॥ मनुष्यनामैरेवैनामाह्वयति । षट् संपद्यंते । षड्वा ऋतवः । ऋतुभिरेवैनामाह्वयति । अदित्या उष्णीषमसीत्याह । यथायजुरेवैतत् । वायुरस्यैड इत्याह । वायुदेवत्यो वै वत्सः । पूषात्वोपावसृजत्वित्याह । पौष्णावै देवतया पशवः ॥२॥ स्वयैवैनं देवतयोपावसृजति । अश्विभ्यां प्रदापयेत्याह । अश्विनौ वै देवानांभिषजौ । ताभ्यामेवास्मै भेषजं करोति । यस्ते स्तनः शशय इत्याह । स्तौत्येवैनाम् । उस्रा घर्मश्शिश्योस्रवर्मं पाहि घर्मायशिश्येत्याह । यथाब्रूयादमुष्मै देहीति । तादृगेव तत् । बृहस्पतिस्त्वोपसीदत्वित्याह ॥ ३ ॥ ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैनामुपसीदति ॥ दानव स्थ पेरव इत्याह । मेध्यानेवैनान् करोति । विष्वग्वृतो लोहितेनेत्याह व्यावृत्यै । अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेत्याह । एताभ्यो ह्येवा देवताभ्यः पिन्वते । इंद्राय पिन्वस्वेन्द्रायपिन्वस्वेत्याह । इंद्रमेव भागधेयेन समर्धयति । द्विरिंद्रायेत्याह ॥ ४ ॥ तस्मादिंद्रो देवतानां भूयिष्ठभाक्तमः । गायत्रोसि त्रैष्टुभोसि जागतमसीति शफोपयमानादत्ते । छन्दोभिरेवैनानादत्ते । सहोर्जो

भागेनोपमेहीत्याह । ऊर्ज एवैनं भागमकः । अश्विनौ वा एतद्यज्ञस्य शिरः प्रतिदधतावब्रूताम् । आवाभ्यामेव पूर्वाभ्यां वषट्क्रियाता इति । इंद्राश्विना मधुनः सारघस्येत्याह । अश्विभ्यामेव पूर्वाभ्यां वषट्करोति । अथो अश्विनावेव भागधेयेन समर्द्धयति ॥ ५ ॥ घर्मं पात वसवोयजता वडित्याह । वसूनेव भागधेयेन समर्द्धयति । यद्वषट्कुर्यात् । यातयामाऽस्य वषट्कारः स्यात् । यन्नवषट्कुर्यात् । रक्षाꣳसि यज्ञꣳहन्युः । वडित्याह । परोक्षमेव वषट् करोति । नास्य यातयामा वषट्कारो भवति । न यज्ञꣳ रक्षाꣳसि घ्नंति ॥६॥ स्वाहा त्वा सूर्यस्य रश्मयेवृष्टिवनये जुहोमीत्याह । योवा अस्य पुण्यो रश्मिः । सवृष्टिवनिः । तस्मा एवैनं जुहोति । मधु हविरसीत्याह । स्वदयत्येवैनम् । सूर्यस्य तपस्तपेत्याह । यथायजुरेवैतत् । द्यावापृथिवीभ्यां त्वापरिगृह्णामीत्याह । द्यावापृथिवीभ्यामेवैनं परिगृह्णाति ॥ ७ ॥ अंतरिक्षेण त्वोपयच्छामीत्याह । अंतरिक्षेणैवैनमुपयच्छति । न वा एतं मनुष्यो भर्तुमर्हति । देवानां त्वा पितृणामनुमतो भर्तुꣳशकेयमित्याह । देवैरेवैनं पितृभिरनुमत आदत्ते । वि वा एनमेतदर्धयंति । यत्पश्चात्प्रवृज्य पुरो जुह्वति । तेजोसि तेजोनुप्रेहीत्याह । तेज एवास्मिन्दधाति । दिविस्पृड्मा माहिꣳसीरंतरिक्षस्पृड्मा माहिꣳसीः पृथिविस्पृड्मा माहिꣳसीरित्याहाहिꣳसायै ॥ ८ ॥ सुवरासि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याह । आशिषमेवैतामाशास्ते । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । आत्मा वायुः । उद्यत्यं वातनामान्याह । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति । अनवानम् । प्राणानाꣳ संतत्यै । पंचाह ॥ ९ ॥ पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति । अग्नेय त्वा वसुमते स्वाहेत्याह । असौ वा आदित्योग्निर्वसुमान् । तस्मा एवैनं जुहोति ।

सोमाय त्वा रुद्रवते स्वाहेत्याह । चन्द्रमा वै सोमो रुद्रवान् । तस्मा एवैनं जुहोति । वरुणाय त्वाऽऽदित्यवते स्वाहेत्याह ॥१०॥ अप्सु वै वरुण आदित्यवान् । तस्मा एवैनं जुहोति । बृहस्पतये त्वा विश्वदेव्यावतेस्वाहेत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणएवैनं जुहोति । सवित्रे त्वप्रसुवते विप्रसुवते प्रसुवते वाजवते स्वाहेत्याह । संवत्सरोवै सवितप्रसुवान्विप्रसुवान् प्रसुवान्वाजवान् । तस्मा एवैनं जुहोति । यमायत्वाङ्गिरस्वते पितृमते स्वाहेत्याह । प्राणो वै यमोऽङ्गिरस्वान्पितृमान् ॥ ११ ॥ तस्मा एवैनं जुहोति । एताभ्य एवैनं देवताभ्यो जुहोति । दश संपद्यन्ते । दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुंधे । रौहिणाभ्यां वै देवाः सुवर्गंलोकमायन् । तद्रौहिणयो रौहिणत्वम् । यद्रौहिणौ भवतः । रौहिणाभ्यामेव तद्यजमानः सुवर्गंलोकमेति । अहर्ज्योतिः केतुना जुषताꣳसुज्योतिर्ज्योतिषाꣳ स्वाहा रात्रिर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहेत्याह । आदित्यमेव तदमुष्मिंल्लोकेऽहो परस्ताद्धाधार । रात्रिया अवस्तात् । तस्मादसावादित्यो मुष्मिंल्लोकेऽहोरात्राभ्यां धृतः ॥ १२ ॥ मनुष्यनामानि पशवः सीदत्वित्याहेन्द्रायेत्याहार्द्धयति ह्नांति गृह्णात्यहिꣳसायै पंचाहादित्यवते स्वाहेत्याह पितृमानेतिचत्वारिं च ॥ ७ ॥ विश्वा आशादक्षिणसादित्याह । विश्वानेव देवान्प्रीणाति । अथो दुरिष्टया एवैनं पाति । विश्वान्देवानयाडिहेत्याह । विश्वानेव देवान्भागधेयेन समर्धयति । स्वाहा कृतस्य धर्मस्य मधोः पिबतमश्विनेत्याह । अश्विनावेव भागधेयेन समर्धयति । स्वाहाग्नये यज्ञियाय शंयर्जुभिरित्याह । अभ्येवैनं धारयति । अथो हविरेवाकः ॥ १ ॥ अश्विना घर्मं पातꣳहार्दिवानमहर्दिवाभिरूतिभिरित्याह । अश्विनावेव भागधेयेन समर्धयति । अनुवां

द्यावापृथिवीमꣳसातामित्याहानुमत्यै । स्वाहेन्द्राय स्वाहेन्द्रावडित्याह । इन्द्राय हि पुरोहूयते । आश्राव्याहघर्मस्य यजेति । वषट्कृते जुहोति । रक्षसामपहत्यै । अनुयजति स्वगाकृत्यै । घर्ममपातमश्विनेत्याह ॥ २ ॥ पूर्वमेवोदितम् । उत्तरेणाभिगृणाति । अनुवां द्यावापृथिवी अमꣳसातामित्याहानुमत्यै । तं प्राव्यं यथावर्णमो दिवेनमः पृथिव्याइत्याह । यथा यजुरेवैतत् । दिविधा इमं यज्ञं यज्ञमिमंदिविधा इत्याह । सुवर्गमेवैनं लोकं गमयति । दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छेत्याह । एष्वेवैनं लोकेषु प्रतिष्ठापयति । पंच प्रदिशोगच्छेत्याह ॥ ३ ॥ दिक्ष्वेवैनं प्रतिष्ठापयति । देवान्धर्मपान्गच्छ पितृन्धर्मपान्गच्छेत्याह ॥ उभयेष्वेवैनं प्रतिष्ठापयति । यत्पिन्वते । वर्षुकः पर्जन्यो भवति । तस्मात्पिन्वमानः पुण्यः । यत्प्राङ्पिन्वते । तद्देवानाम् । यद्दक्षिणा । तत्पितृणाम् ॥ ४ ॥ यत्प्रत्यक् । तन्मनुष्याणाम् । यदुदङ् । तद्रुद्राणाम् । प्राचमुदंचं पिन्वयति । देवत्राऽकः । अथो खलु । सर्वा अनुदिशः पिन्वयति । सर्वा दिशः समेधते । अंतः परिधिं पिन्वयति ॥ ५ ॥ तेजसो स्कंदाय । इषे पीपिह्यूर्जे पीपिहीत्याह । इषमेवोर्जं यजमाने दधाति ॥ यजमानाय पीपिहीत्याह । यजमानायैवैतामाशिषमाशास्ते । मह्यं ज्यैष्ठ्याय पीपिहीत्याह । आत्मन एवैतामाशिषमाशास्ते । त्विष्यै त्वाद्युम्नाय त्वेन्द्रियाय त्वा भूत्यैत्वेत्याह । यथायजुरेवैतत् । धर्मासि सुधर्मा मेन्यस्मे ब्रह्माणि धारयेत्याह ॥ ६ ॥ ब्रह्मन्नेवैनं प्रतिष्ठापयति । नेत्त्वावातः स्कंदयादिति । यद्यभिचरेन् । अमुष्य त्वा प्राणे सादयाम्यमुना सह निरृतं गच्छेतिब्रूयाद्यं द्विष्यात् । यमेवद्वेष्टि । तेनैनꣳ सह निरृतं गमयति । पूष्णे शरसे स्वाहेत्याह । या एव देवता हुतभागाः । ताभ्यएवैनं जुहोति । ग्रावभ्यः स्वाहेत्याह । या एवान्त-

रिक्षे वाचः ॥ ७ ॥ ताभ्य एवैनं जुहोति । प्रतिरेभ्यः स्वाहेत्याह । प्राणा वै देवाः प्रतिराः । तेभ्य एवैनं जुहोति । द्यावा पृथिवीभ्याꣳस्वाहेत्याह । द्यावापृथिवीभ्यामेवैनं जुहोति । पितृभ्यो घर्मेपेभ्यः स्वाहेत्याह । ये वै यज्ञानः । ते पितरो घर्मपाः । तेभ्य एवैनं जुहोति ॥ ८ ॥ रुद्राय रुद्रहोत्रे स्वाहेत्याह । रुद्रमेव भागधेयेन समर्धयति । सर्वतः समनक्ति । सर्वत एव रुद्रं निरवदयते । उदीचं निरस्यति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते । अपउपस्पृशति मेध्यत्वाय । नान्वीक्षेत । यदन्वीक्षेत ॥ ९ ॥ चक्षुरस्य प्रमायुकꣳस्यात् । तस्मान्नान्वीक्ष्यः । अपीपरो माहो रात्रियै मापाह्येषाते अग्ने समित्तया समिध्यस्वायुर्मेदा वर्चसा माऽऽभीरित्याह । आयुरेवास्मिन् वर्चो दधाति । अपीपरो मारात्रिया अहो मापाह्येषाते अग्ने समित्तया समिध्यस्वायुर्मेदा वर्चसा माऽऽभीरित्याह । आयुरेवास्मिन्वर्चो दधाति । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेत्याह । यथा यजुरेवैतत् । ब्रह्मवादिनो वदंति । होतव्यमग्निहोत्रं ३ न होतव्यं ३ मिति ॥ १० ॥ यद्यजुषा जुहुयात् । अयथापूर्वमाहुती जुहुयात् । यन्नजुहुयात् । अग्निः पराभवेत् । भूः स्वाहेत्येव होतव्यम् । यथापूर्वमाहुती जुहोति । नाग्निः पराभवति । हुतꣳहविर्मधुहविरित्याह । स्वदयत्येवैनम् । इन्द्रं तमेमावित्याह ॥ ११ ॥ प्राणो वा इन्द्रतमोग्निः । प्राण एवैनमिन्द्रतमेमौ जुहोति । पिता नोसि मा माहिꣳसीरित्याहाहिꣳसायै । अश्याम ते देव धर्म मधुमतो वाजवतः । पितुमत इत्याह । आशिषमेवैतामाशास्ते । स्वधाविनोऽशीमहि त्वा मामाहिꣳसीरित्याहाहिꣳसायै । तेजसा वा एते व्यृध्यंते । ये प्रवर्ग्येण चरंति । प्राश्नंति । तेज एवात्मन्दधते ॥ १२ ॥ संवत्सरं न माꣳसमश्नीयात् ।

न रामामुपेयात् । न मृन्मयेन पिबेत् । नास्य राम उच्छिष्टं पिबेत् । तेज एव तत्सम्भरिष्यति । देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । विभ्राजिं सौर्यं ब्रह्मसन्यदधत । यत्किंचिदिवाकीर्त्यम् ॥ तदेतैनैव व्रतेनागोपायत् । तस्मादेतद्व्रतं चार्यम् । तेजसो गोपीथाय । तस्मादेतानियजूंषि विभ्राजः सौर्यस्येत्याहुः । स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः सम्भरति । स्वाहा त्वा नक्षत्रेभ्य इति सायम् । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति ॥ १३ ॥ अकरश्चिनेत्याह प्रदिशोगच्छेत्याह पितृणामंतः परिधि पिन्वयति धारयेत्याह वाचो धर्मपास्तेभ्य एवैनं जुहोत्यन्वीक्षेतहोतव्या ३ मित्यग्नावित्याह दधते गोपायत्सप्तच ॥ ८ ॥ घर्म या ते दिवि शुगिति तिस्र आहुतीर्जुहोति । छन्दोभिरेवास्यैभ्यो लोकेभ्यः शुचमवयजते । इयत्यग्रे जुहोति । अथेयत्यथेयति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यः शुचमवयजते । अनुनो द्यानुमतिरित्याहानुमत्यै । दिवस्त्वा परस्पाया इत्याह । दिव एवेमाल्लोकान् दाधार । ब्रह्मणस्त्वा परस्पाया इत्याह ॥ १ ॥ एष्वेव लोकेषु प्रजा दाधार । प्राणस्य त्वा परस्पाया इत्याह । प्रजास्वेव प्राणान् दाधार । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः । तं यद्दक्षिणा प्रत्यंच मुदंचमुद्वासयेत् । जिह्मं यज्ञस्य शिरो हरेत् । प्राञ्चमुद्वासयति । पुरस्तादेव यज्ञस्य शिरः प्रतिदधाति ॥ २ ॥ प्राञ्चमुद्वासयति । तस्मादसावादित्यः पुरस्तादुदेति ॥ शफोपयमांधवित्राणि धृष्टी इत्यन्ववहरति । सात्मानमेवैनꣳ सतनुं करोति । सात्मामुष्मिंल्लोकेभवति । य एवं वेद । औदुंबराणि भवंति । ऊर्वा उदुंबरः । ऊर्जमेवावरुंधे । वर्त्मनावा अन्वित्य ॥३॥ यज्ञꣳ रक्षाꣳसि जिघाꣳसंति । साम्ना प्रस्तोतान्वैवेति । सामवै

रक्षोहा । रक्षसामपहत्यै । त्रिर्निधनमुपैति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो रक्षाꣳस्यपहंति । पुरुषः पुरुषो निधनमुपैति ॥ पुरुषः पुरुषोहि रक्षस्वी । रक्षसामपहत्यै ॥ ४ ॥ यत्पृथिव्यामुद्वासयेत् । पृथिवीꣳ शुचार्पयेत् । यदप्सु । अपः शुचार्पयेत् । यदोषधीषु । ओषधीः शुचार्पयेत् । यद्वनस्पतिषु । वनस्पतींच्छुचार्पयेत् । हिरण्यं निधायोद्वासयति । अमृतं वै हिरण्यम् ॥ ५ ॥ अमृत एवैनं प्रतिष्ठापयति । वल्गुरसि शंयुधाया इति त्रिःपरिषिंचन्पर्येति । त्रिवृद्वा अग्निः । यावानेवाग्निः । तस्य शुचꣳ शमयति । त्रिः पुनः पर्येति । षट्संपद्यंते । षड्वा ऋतवः । ऋतुभिरेवास्य शुचꣳ शमयति । चतुस्रक्तिनाभिर्ऋतस्येत्याह ॥ ६ ॥ इयं वा ऋतम् । तस्या एष एव नाभिः । यत्प्रवर्ग्यः । तस्मादेवमाह । सदोविश्वायुरित्याह । सदोहीयम् । अप द्वेषो अप ह्वर इत्याह भ्रातृव्यापनुत्यै । घर्मोसित्तेऽन्नमेतत्पुरीषमिति दध्ना मधुमिश्रेण पूरयति । ऊर्वा अन्नाद्यं दधि । ऊर्जैवैनमन्नाद्येन समर्द्धयति ॥ ७ ॥ अनंशनायुको भवति । य एवं वेद । रंतिर्नामासि दिव्योगंधर्व इत्याह । रूपमेवास्यैतन्महिमानꣳरंतिं बंधुतां व्याचष्टे । समहमायुषा संप्राणेनेत्याह । आशिषमेवैतामाशास्ते । व्यसौयोस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह । अभिचार एवास्यैषः । अचिक्रदद्वृषा हरिरित्याह । वृषा ह्येषः ॥ ८ ॥ वृषा हरिः । महान्मित्रो न दर्शत इत्याह । स्तौत्येवैनमेतत् । चिदसि समुद्रयोनिरित्याह । स्वामेवैनं योनिं गमयति । नमस्ते अस्तु मा माहिꣳसीरित्याहाहिꣳसायै । विश्वावसुꣳ सोमगंधर्वमित्याह । यदेवास्य क्रियमाणस्यांतर्यंति । तदेवास्यैतेनाप्याययति । विश्वावसुरभि तन्नो गृणात्वित्याह ॥ ९ ॥ पूर्वमेवोदितम् । उत्तरेणाभिगृणाति । धियो हिन्वानो धिय इन्नो अव्यादित्याह । ऋतूनेवास्मै

कल्पयति। प्रासां गंधर्वो अमृतानि वोचदित्याह। प्राणा वा अमृताः। प्राणानेवास्मै कल्पयति। एतत्त्वं देव घर्मदेवो देवानुपागा इत्याह। देवो ह्येष सन्देवानुपैति। इदमहं मनुष्यो मनुष्यानित्याह ॥ १० ॥ मनुष्योहि। एष सन्मनुष्यानुपैति। ईश्वरो वै प्रवर्ग्यमुद्वासयन्। प्रजां पशून्सोमपीथमनूद्वासः सोमपीथानुमेहि। सह प्रजया सह रायस्पोषेणेत्याह। प्रजामेव पशून्सोमपीथमात्मन्धत्ते। सुमित्रा न आप ओषधयः संत्वित्याह। आशिषमेवैतामाशास्ते। दुर्मित्रास्तास्मै भूयासुर्योस्मान् द्वेष्टि यं च वयं द्विष्म इत्याह। अभिचार एवास्यैषः। प्र वा एषोस्माल्लोकाच्च्यवते। यःप्रवर्ग्यमुद्वासयति। इदुत्यं चित्रमिति सौरीभ्यामृग्भ्यां पुनरेत्य गार्हपत्ये जुहोति। अयं वै लोको गार्हपत्यः। अस्मिन्नेव लोके प्रतितिष्ठति। असौ खलु वा आदित्यः सुवर्गो लोकः। यत्सौरीभवतः। तेनैव सुवर्गाल्लोकान्नैति ॥ ११ ॥ ब्रह्मणस्त्वाप्रस्थाया इत्याह दधात्यन्वित्यं रक्षस्वीरक्षसामपहत्यै वैहिरण्यमाहार्ष्यति ह्येष गृणात्वित्याह मनुष्यानित्याहास्यैषोष्टौ च ॥ ९ ॥ प्रजापतिं वै देवाः शुक्रं पयोदुहन्। तदेभ्यो न व्यभवत्। तदग्निर्व्यकरोत्। तानि शुक्रियाणि सामान्यभवन्। तेषां यो रसोत्यक्षरत्। तानि शुक्रयजूंष्यभवन्। शुक्रियाणां वा एतानि शुक्रियाणि। सामपयसं वा एतयोरन्यत्। देवानामन्यत्पयः। यद्वोः पयः ॥ १ ॥ तत्साम्नः पयः। यदजायै पयः। तद्देवानां पयः। तस्माद्यत्रैतैर्यजुर्भिश्चरन्ति। तत्पयसा चरंति। प्रजापतिमेवतद्देवान्पयसान्नाद्येन समर्द्धयंति। एष ह त्वै साक्षात्प्रवर्ग्यं भक्षयति। यस्यैवं विदुषः प्रवर्ग्यः प्रवृज्यते। उत्तरवेद्यामुद्वासयेत्तेजस्कामस्य। तेजो वा उत्तरवेदिः ॥ २ ॥ तेजः प्रवर्ग्यः। तेजसैव तेजः समर्द्धयति। उत्तरवेद्यामुद्वासयेदन्नकामस्य। शिरो

वा एतद्यज्ञस्य। यत्प्रवर्ग्यः। मुखमुत्तरवेदिः। शीर्ष्णैव मुखꣳसंदधात्यन्नाद्याय। अन्नाद एव भवति। यत्र खलु वा एतमुद्वासितं वयाꣳसि पर्यासते। परिवैताꣳसर्मां प्रजावयाꣳस्यासते ॥ ३ ॥ तस्मादुत्तरवेद्यामेवोद्वासयेत्। प्रजानां गोपीथाय। पुरो वा पश्चाद्वोद्वासयेत्। पुरस्ताद्वा एतज्ज्योतिरुदेति। तत्पश्चान्निम्रोचति। स्वामेवैनं योनिमनूद्वासयति। अपां मध्य उद्वासयेत्। अपां वा एतन्मध्याज्ज्योतिरजायत। ज्योतिः प्रवर्ग्यः। स्वएवैनं योनौ प्रतिष्ठापयति ॥ ४॥ यं द्विष्यात्। यत्र स स्यात्। तस्यां दिश्युद्वासयेत्। एष वा अग्निर्वैश्वानरः। यत्प्रवर्ग्यः। अग्निनैवैनं वैश्वानरेणाभिप्रवर्तयति। औदुंबर्याꣳ शाखायामुद्वासयेत्। ऊर्ग्वा उदुंबरः। अन्नं प्राणः। शुग्घर्मः ॥ ५ ॥ इदमहममुष्यामुष्यायणस्य शुचा प्राणमपि दहामीत्याह। शुचैवास्य प्राणमपि दहति। ता जगार्तिमार्च्छति। यत्र दर्भा उपदीकसंततास्युः। तदुद्वासयेद्वृष्टिकामस्य। एता वा अपामनूज्झार्योनाम। यद्दर्भाः। असौ खलु वा आदित्यइतोवृष्टिमुदीरयति। असावेवास्मा आदित्यो वृष्टिं नियच्छति। ना आपो निर्यताधन्वनायंति ॥ ६ ॥ गोः पय उत्तरवेदिरासते स्थापयति घर्मायंति ॥ १० ॥ प्रजापतिः संध्रियमाणः। संम्राट् संभृतः। घर्मः प्रवृक्तः। महावीर उद्वासितः। असौ खलु वा वैष आदित्यः। यत्प्रवर्ग्यः। स एतानि नामान्यकुरुत। य एवंवेद। विदुरेनं नाम्ना। ब्रह्मवादिनो वदंति ॥ १ ॥ यो वै वसीयाꣳसं यथानाममुपचरति। पुण्यार्तिं वै स तस्मै कामयते। पुण्यार्तिमस्मै कामयते ॥ य एवं वेद। तस्मादेवं विद्वान्। घर्म इति दिवाचक्षीतासम्राडिति नक्तम्। एते वा एतस्य प्रिये तनुवौ। एते अस्य प्रिये नामनी। प्रिययैवैनं तनुवा ॥ २ ॥ प्रियेण नाम्ना

समर्धयति। कीर्तिरस्य पूर्वागच्छति। जनतामायतः। गायत्री देवेभ्योपाक्रामत्। तां देवाः प्रवर्ग्येणैवानुव्यभवन्। प्रवर्ग्येणाप्नुवन्। यच्चतुर्विंशतिः कृत्वः प्रवर्ग्यं प्रवृणक्ति। गायत्रीमेव तदनुविभवति। गायत्रीमाप्नोति। पूर्वास्य जनतायतः कीर्तिर्गच्छति। वैश्वदेवः सरस्वन्नः॥ ३॥ वसवः प्रवृक्तः। सोमोभिक्रीयमाणः। आश्विनः पर्यस्यानीयमाने। मारुतः कवन्। पौष्ण उद्यतः। सारस्वतो विष्यंदमानः। मैत्रः शरोगृहीतः। तेज उद्यतो वायुः। ह्रियमाणः प्रजापतिः। हूयमानो वाग्घुतः॥ ४॥ असौ खलु वा वैष आदित्यः। यत्प्रवर्ग्यः। सएतानि नामान्यकुरुत। य एवं वेद। विदुरेनं नाम्ना। ब्रह्मवादिनो वदंति। यन्मृन्मयमाहुर्ति नाश्नुतेथ। कस्मादेषोऽनुत इति। वागेष इति ब्रूयात्। वाच्येव वाचं दधाति॥५॥ तस्मा दश्नुते। प्रजापतिर्वा एष द्वादशधा विहितः। यत्प्रवर्ग्यः। यत्रागवकाशेभ्यः। तेन प्रजा असृजत। अवकाशैर्देवासुरानसृजत। यदूर्ध्वमवकाशेभ्यः। तेनात्मानमसृजत। [illegible] प्रजापतिर्वैषः॥ ६॥ वदंति तनुवासरस्सन्नोहूयमानोवाग्घुतो दधात्येषः॥ ११॥ सविता भूत्वा प्रथमेहन्प्रवृज्यते। तेन कामाप्नोति। यद्द्वितीयेहन्प्रवृज्यते। अग्निर्भूत्वादेवानेति। यत्तृतीयेहन्प्रवृज्यते। वायुर्भूत्वा प्राणानेति। यच्चतुर्थेहन्प्रवृज्यते। आदित्यो भूत्वा रश्मीनेति। यत्पंचमेहन्प्रवृज्यते। चंद्रमा भूत्वा नक्षत्राण्येति॥ १॥ यत्षष्ठेहन्प्रवृज्यते। ऋतुर्भूत्वासंवत्सरमेति। यत्सप्तमेहन्प्रवृज्यते। धाता भूत्वा शाकरीमेति। यदष्टमेहन्प्रवृज्यते। बृहस्पतिर्भूत्वा गायत्रीमेति। यन्नवमेहन्प्रवृज्यते। मित्रोभूत्वा त्रिवृत इमांल्लोकानेति। यद्दशमेहन्प्रवृज्यते। वरुणोभूत्वा विराजमेति॥ २॥ यदेकादशेहन्प्रवृज्यते। इंद्रोभूत्वा त्रिष्टुभमेति।

यद्द्वादशेऽहन्प्रवृज्यते । सोमोभूत्वासुत्यामेति । यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः परोऽमूंल्लोकान्स्तपन्नेति । यदुपरिष्टादुपसदां प्रवृज्यते । तस्मादमुतोवोऽमूंल्लोकान्स्तपन्नेति । यएवंवेद । एवंतपति ॥ ३ ॥ नक्षत्राण्येति विराजमेति तपति ॥ १२ ॥ देवावै सत्रꣳ सांवित्रं परिश्रिते ब्रह्मन्प्रचरिष्यामोऽग्निष्ट्वा शिरोग्रीवा देवस्यशनां विश्वा आशा घर्म यातेप्रजापतिꣳ शुक्रं प्रजापतिः संभ्रियमाणः सविताद्वादश॥१२॥देवावै सत्रꣳसखादिरः परिश्रितेभिपूर्वमथो रक्षसांग्रैष्मावेव ब्रह्म वै देवानामश्विना धर्मं पातं प्राणोवै इन्द्रं तमोग्निर्वृषाहरियोवै वलीयाꣳसं यथा नाममष्टोत्तरशतम् ॥१०८॥ उगग्निरसौ ग्रीवा आत्मा पुनरसौ तं यन्मुखं ॥ + ॥ शन्नस्तन्नो माहासीत् । ॐ शांतिः शांतिः शांतिः ॥ हरिः ॐ ॥

हरिः ॐ ॥ संत्वा सिंचामि यजुषा प्रजामायुर्धनं च ॥ ॐ शांतिः शांतिः शांतिः ॥ हरिः ॥ ॐ ॥ परे युवाꣳसं प्रवतो महीरनुबहुभ्यः पंथामनपस्पशानम्। वैवस्वतꣳ संगमनं जनानां यमꣳ राजानꣳ हविषा दुवस्यत। इदं त्वा वस्त्रं प्रथमंन्वागन्नपैत दूंह यदिहाबिभः पुरा।इष्टापूर्तमनुसंपश्य दक्षिणां यथाते दत्तं बहुधा विबंधुषु। इमौ युनज्मिते वह्नी असुनीथाय वोढवे । याभ्यां यमस्य सादनꣳ सुकृतां चापि गच्छतात् । पूषात्वेतश्चयावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः। सत्वेतेभ्यः परिददात्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रेभ्यः । पूषेमा आशा अनुवेद सर्वाः सो अस्माꣳ अभयतमेननेषत्। स्वस्तिदा अघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रविद्वान् ॥ १ ॥ आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्रासते सुकृतोयत्रते ययुस्तत्र त्वा देवः सविता दधातु । भुवनस्य पत इदꣳ हविः । अग्नये रयिमते स्वाहा । पुरुषस्य सया-

वर्यपेदघानि' मृज्महे । यथा नो अत्र नापरः पुरा जरस आयति । पुरुषस्य सया वीरविते'प्राणमसिन्नसम् ॥ शरीरेण महीमिहि स्वधयेहि' पितृनुप प्रजयास्मानिहावह । मैवं मा॑स्ता'प्रियेहं देवो सती पितृलोकं यदैषि' । विश्ववारा नमसा संव्ययंत्युभौ नो' लोकौ पर्यसाभ्याववृत्स्व ॥ २ ॥ इयन्नारी' पतिलोकं वृणाना निपद्यत उपत्वा मर्त्य प्रेतम् । विश्वं पुराणमनुपालयंती तस्यै' प्रजां द्रविणं चेह धेहि । उदीर्ष्वनार्यभिजीवलोकमितासुमेतमुपशेष एहि' । हस्तग्राभस्य दिधिषोस्वमेतत्पत्युर्जनित्वमभिसंबभूव । सुवर्णं॑ हस्तादादद्दाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय । अत्रैव त्वमिह वयं॑ सुशेवा विश्वास्पृधो' अभिमातीर्जयेम । धनुर्हस्तादादद्दाना मृतस्य श्रियै क्षत्रायौजसे बलाय । अत्रैवत्वमिह वय॑सुशेवा विश्वात्पृधो' अभिमातीर्जयेम । मणिं॑ हस्तादादद्दाना मृतस्य श्रियै विशे पुष्टयै बलाय । अत्रैवत्वमिह वय॑सुशेवा विश्वास्पृधो' अभिमातीर्जयेम । इममग्ने चमसं मा विजीहरः प्रियोदेवानामुतसोम्यानाम् । एषयश्चमसो देवपानस्तस्मिंदेवा अमृता मादयंताम् । अग्ने वर्म परिगोभिर्व्ययस्वसंप्रोर्ण्वमेदंसा पीवसा च । नेत्त्वाधृष्णुर्हरसाजहृषाणो दधद्विधक्ष्यन्पर्यखयाते । मैनमग्ने विदहो माभिशोचो मास्य त्वचं चिक्षिपो मा शरीरम् । यदा शृतं करवो' जातवेदोथेमेनं प्रहिणुतात्पितृभ्यः॥ शृतंयदाऽकरसि जातवेदोथेमेनं परि'दत्तात्पितृभ्यः । यदागच्छात्यसुनीतिमेतामथा देवानां वशनी भवाति । सूर्यं तेचक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । अजोऽभागस्तपसा तं तपस्वं तं ते शोचिस्तपतु तं ते अर्चिः । यास्ते' शिवास्तनुवो जातवदेस्ताभिर्वहेमं॑सुकृतां यत्र लोकाः । अयं वै त्वमस्मादधित्वमेतदयंवैतदस्ययोनिं॑

रासि । वैश्वानरः पुत्रः पित्रेलोककृज्जातवेदो वहेमꣳ सुकृतां यत्र लोकाः ॥४॥ विद्वानभ्यावर्त्स्वाभिमातीर्जयेम शरीरैश्चत्वारिंच ॥ १ ॥ य एतस्य पथो गोप्तारस्तेभ्यः स्वाहा य एतस्य पथो रक्षितारस्तेभ्यः स्वाहा य एतस्यपथो-ऽभिरक्षितारस्तेभ्यः स्वाहा ख्यात्रे स्वाहाऽपाख्यात्रे स्वाहा भिलालपते स्वाहा ऽपलालपते स्वाहाग्नये कर्मकृते स्वाहा यमत्रनाधीमस्तस्मै स्वाहा । यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपतेत्वाया । दिवो विश्वस्मात्सीमघायत उरुष्यः । अस्मात्त्वमधि जातोसि त्वदयंजायतांपुनः । अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहा ॥ १ ॥ य एतस्यत्वत्पंचं ॥ २ ॥ प्रकेतुना बृहता भात्यग्निराविर्विश्वानिवृषभो रोरवीति । दिवश्चिदंतादुपमामुदानडपामुपस्थे महिषो ववर्द्ध । इदंतएकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे । नाकं सुपर्णमुपयत्पतंतꣳहृदावेनंतो अभ्यचक्षतत्वा । हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् । अतिद्रवसारमेयौ श्वानौ चतुरक्षौशबलौसाधुनापथा । अथा-पितृन्सुविदत्राꣳ अपीहि यमेन ये सधमादं मदंति । यौ ते श्वानौ यम रक्षि-तारौ चतुरक्षौ पथिरक्षी नृचक्षसा । ताभ्याꣳराजन्परिं देह्येनꣳस्वस्ति चास्मा अनमीवं च धेहि ॥१॥ उरुण सावसुतृपावुलुंबलौ यमस्य दूतौ चरतो वशाꣳ अनु । तावस्मꣳ हृशेयꣳय सूर्याय पुनर्दत्ता वसुमद्येह भद्रम्। सोम एकेभ्यःपवते घृत मेकउपासते । येभ्यो मधु प्रधावति ताꣳश्चिदेवापि गच्छतात् । ये युध्यंते प्रधनेषुशूरासोयंतनुत्यजः । ये वा सहस्रदक्षिणास्ताꣳश्चिदेवापि गच्छतात् ।तपसा ये अनाधृष्यास्तपसा ये सुवर्गताः। तपो ये चक्रिरे महत्ताꣳश्चिदेवापि गच्छतात्। अग्नेमन्वतीरेवतीः सꣳसंभध्वमुत्तिष्ठत प्रतरतासखायः । अत्राजहाम ये असन्न-

शंवाः शिवान्वयमभिवाजानुत्तरेम ॥ २ ॥ यद्वै देवस्य सवितुः पवित्रꣳ सहस्रधारं विततमंतरिक्षे । येनापुनादिंद्रमनार्तमार्त्यै तेनाहं माꣳसर्वतनुं पुनामि । या राष्ट्रात्पन्नादपयांति शाखा अभिमृतानृपतिमिच्छमानाः । धातुस्ताः सर्वाः पवनेन पूताः प्रजयास्मान् रय्या वर्चसासꣳसृजाथ । उद्वयं तमꣳस्परिपश्यंतो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् । धाता पुनातु सविता पुनातु । अग्नेस्तेजसा सूर्यस्य वर्चसा ॥ ३ ॥ धेह्युत्तरे माष्टौचं ॥ ३ ॥ यंते अग्निममन्थाम वृषभायेव पक्तवे । इमं तꣳशमयामसि क्षीरेण चोदकेन च । यं त्वमग्ने समदहस्त्वमुनिर्वापया पुनः । क्यांबूरत्रजायतां पाकदूर्वाव्यल्कशा । शीतिकेशीतिकावति ह्लादुके ह्लादुकावति । मंडूक्यांसुसंगमयेमꣳस्वग्निꣳशमय । शंते धन्वन्या आपः शमुते संत्वनूक्यांः । शंते समुद्रिया आपः शमुते संतु वर्ष्याः । शंते स्रवंतीस्तनुवे शमुते संतुकूप्याः । शं ते नीहारो वर्षतुशमुपृष्वावशीयताम् ॥१॥ अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः । आयुर्वसानउपयातु शेषꣳसंगच्छतांतनुवा जातवेदः । संगच्छस्व पितृभिः सꣳस्वधाभिः समिष्टापूर्तेन परमे व्योमन् । यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधातु । यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः । अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो ब्राह्मणमाविवेश । उत्तिष्ठातस्तनुवꣳ सं भरस्व मेह गात्रमवहा मा शरीरम् । यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधातु । इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तनुवैचारुरेधि प्रियोदेवानां परमेसधस्थे । उत्तिष्ठ प्रेहि प्रद्रवाकः कृणुष्व परमे व्योमन् । यमेन त्वं यम्यासं विदानोत्तमं नाकमधिरोहेमम् । अꣳसन्वतीरेवतीर्यद्वैदेवस्य

सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयंतमंसस्परि धाता पुनातु । अस्मात्त्वमधि जातोऽस्यं त्वदधिजायतम् । अग्नये वैश्वानरायं सुवर्गाय लोकाय स्वाहा ॥ २॥ अवशीयताꣳ सधस्थेपंचच ॥ ४ ॥ आयातु देवः सुमनाभिरूतिभि- र्यमो हवेह प्रयताभिरक्ता । आसीदताꣳसुप्रयते ह बर्हिष्यूर्जायजात्यै मम शत्रु- हत्यै । यमे इव यतमाने यदैतं प्रवाभरन्मानुषा देवयंतः । आसीदतꣳ स्वमु- लोकं विदाने स्वासस्थेभवतामिदं वे नः । यमायसोमꣳसुनुतयमायं जुहुताहविः । यमꣳह यज्ञो गच्छत्यग्निदूतो अरंकृतः । यमायं घृतवद्धविर्जुहोत प्रचेतिष्ठत । स नो देवेष्वायंदहीर्घमायुःप्रजीवसे । यमाय मधु मत्तमꣳ राज्ञे हव्यं जुहोतन । इदन्नम ऋषिभ्यःपूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥१॥ योस्य कौष्ठय जगतः पार्थिवस्यैक इद्वशी । यमं भंग्यश्रवो गायो राजा न परोध्यः । यमं गाय भंग्यश्रवो यो राजाऽन परोध्यः ॥ ३॥ येनापो नद्यो धन्वानि येन द्यौः पृथिवी दृढा । हिरण्य कक्ष्यान्सुधुरान्हिरण्याक्षानयःशफान् । अश्वानन्नश्यतो दानं यमो राजाऽभितिष्ठति । यमो दाधार पृथिवीं यमो विश्वमिदं जगत् । यमाय सर्व मित्रस्थे यत्प्राणद्वायुरक्षितम् । यथा पंच यथा षडथा पंचदशर्षयः । यमं यो विद्यात्स ब्रूयाद्यथैक ऋषिर्विजानते ॥ २ ॥ त्रिकद्रुकेभिः पतंतिषड्वीरकमिद्वृहत् । गायत्री त्रिष्टुप्छंदाꣳसि सर्वा ता यम आहिता । अहरहर्नयमानो गामश्वं पुरुष जगत् । वैवस्वतो न तृप्यति पंचभिर्मानवैर्यमः । वैवस्वते विविच्यते यमे राजनि ते जनाः ॥ये चेह सत्येनेच्छंते य उ चानृतवादिनः । ते राजन्निह विविच्यंतेऽथायंति त्वामुप । देवाꣳश्च ये नमस्यंति ब्राह्मणाꣳश्चा- पचित्यंति । यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रानो विश्पतिः पिता पुराणा अनुवेनति ॥ ३ ॥ पथिकृद्भ्यो निजानतेनुवेनति ॥५॥ वैश्वा-

नरे हविरिदं जुहोमि साहस्रमुत्सꣳशतधारमेतम् । तस्मिन्नेष पितरं पितामहं
प्रपितामहं बिभरत्पिन्वमाने । द्रप्सश्चस्कंद पृथिवीमनुद्यामिमं च योनिमनु-
यश्च पूर्वः । तृतीयं योनिमनुसंचरंतं द्रप्सं जुहोम्यनु सप्तहोत्राः । इमꣳ समु-
द्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं जना-
याग्ने माहिꣳसीः परमे व्योमन् । अपेत वीतविचसर्पतातो येत्रस्थ पुराणा ये
च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै । सवितैतानि
शरीराणि पृथिव्यै मातुरुपस्थ आदधे । तेभिर्युज्यतामन्नियाः ॥ १ ॥ शुनं
वाहाः शुनं नराः शुनं कृषतु लांगलम् । शुनं वरत्रा बध्यंताꣳ शुनमष्ट्रामुदि-
ंगयम् । नासीरा शुनमस्मासु धत्तां शुनासीराविमां वाचं यदिवि चक्रथुः
पयः । तेनेमामुपसिंचतम् । सीते वंदामहे त्वार्वाची सुभगे भव । यथा
नः सुभगा ससि यथा नः सुफलासि । सवितैतानि शरीराणि पृथिव्यै
मातुरुपस्थ आदधे । तेभिरदिते शं भव । विमुंच्यध्वमन्नियाः दैव्यानाः
अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्म ॥ २ ॥ प्रवाता
वांति पतयंन्ति विद्युत उदोषधीर्जिहतेपिन्वते सुवः । इरा विश्वस्मै
भुवनाय जायते यत्पर्जन्यः पृथिवीꣳरेतसावति । यथा यमाय हार्म्यमवप-
न्पंच मानवाः । एवं वपामि हार्म्ये यथासामजीवलोके भूरयः । चितस्थप-
रिचित ऊर्ध्वचितः श्रयध्वं पितरो देवता । प्रजापतिर्वः सादयतु तया देव-
तया । आप्यायध्वं संते ॥ ३ ॥ अन्नियाः अगन्म सप्त च ॥ ६ ॥ उत्ते
तभ्नोमि पृथिवीं त्वत्परीमं लोकं निदधन्मो अहꣳ रिषम् । एताꣳस्थूणां पितरो
धारयंतु ते त्रायमः सादनात्ते मिनोतु । उपसर्प मातरं भूमिमेतामुरुव्यच
संपृथिवीꣳसुशेवाम् । ऊर्णम्रायुवतिर्दक्षिणावत्येषा त्वापातु निर्ऋत्या उपस्थे ।

उच्छ्रमञ्चस्व पृथिवि माविबाधिथाः सूपायनास्मै भव सूपवंचना । माता पुत्रं यथासिचाभ्येनं भूमि वृणु । उच्छ्रमञ्चमाना पृथिवी हि तिष्ठसि सहस्रं मित उपाहिश्रयंताम् । ते गृहासो मधुश्चुतो विश्वाहास्मैशरणाः संत्वत्र । एणी द्वीनाहरिणीरर्जुनीः संतु धेनवः । तिलवत्सा ऊर्जमस्मै दुहानाविश्वाहासंत्वनपस्फुरंतीः ॥ १ ॥ एषा ते यमसादने स्वधा निधीयते गृहे । अक्षितिर्नाम ते असौ । इदं पितृभ्यः प्रभरेम बर्हिर्देवेभ्यो जीवंत उत्तरं भरेम । तत्त्वमारोहासो मेध्योभवं यमेन त्वं यम्या संविदानः । मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि त्वम्पितॄन्यत्र गच्छास्येधांसं यमराज्ये । मा त्वा वृक्षौ संबाधेथांमा माता पृथिवी मही। वैवस्वतꣳ हि गच्छांसि यमराज्ये विराजसि । नळं पुवमारोहैतं नळेन पथोन्विहि । स त्वं नळपुवो भूत्वा संतरप्रतरोत्तर ॥ २ ॥ सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे । तेभ्यः पृथिवि शंभव । षड्ढौता सूर्यं ते चक्षुर्गच्छतु वातमात्माद्यां च गच्छ पृथिवीं च धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । परं मृत्यो अनुपरेहि पंथां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजाꣳरीरिषो मोतवीरान् । शं वातः शꣳ हि ते घृणिः शमुते संत्वोषधीः । कल्पंतां मे दिशः शम्माः । पृथिव्यास्त्वालोके सादयाम्यमुष्यशर्मासि पितरो देवता । प्रजापतिस्त्वासादयतु तया देवतया । अंतरिक्षस्य त्वादिवस्त्वादिशांत्वानाकस्यत्वापृष्ठे ब्रह्मस्त्वाविष्टपे सादयाम्यमुष्य शर्मासि पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया ॥ ३ ॥ अनपस्फुरंतीरुत्तर देवतया द्वे च ॥ ७ ॥ अपूपवान्घृतवाꣳश्चरुरेहि सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतः सप-

र्यतयेदेवानां घृतभागाइहस्थ । एषा ते यमसादने स्वधा निधीयते गृहेसौ । दशाक्षरा ताꣳ रक्षस्वतां गोपायस्व तां ते परिददामि तस्यां त्वामादभन्पितरो देवता । प्रजापतिस्त्वासादयतु तया देवतया । अपूपवाञ्छृतवान्क्षीरवान्दधिवान्मधुमाꣳश्चरुरेहसीदत्तत्तभ्नुवन्पृथिवीं द्यामुतोपरिं । योनिकृतः पथिकृतः सपर्यतये देवानाꣳ शृतभागाः क्षीरभागा दधिभागा मधुभागा इहस्थ । एषा ते यमसादने स्वधा निधीयते गृहेसौ । शताक्षरा सहस्राक्षराऽयुताक्षराच्युताक्षराताꣳरक्षस्वतां गोपायस्वतांतेपरिददामितस्यांत्वामादभन्पितरो देवता । प्रजापतिस्त्वा सादयतु तयादेवतया ॥ १ ॥ अपूपवानसौ दशा॥८॥

एतास्ते स्वधा अमृताः करोमि यास्ते धानाः परिकिराम्यत्र । तास्तेयमः पितृभिः संविदानो त्रं धेनूः कामदुघाः करोतु । त्वामर्जुनौषधीनां पयो ब्रह्माण इद्विदुः । तासांत्वामध्यादादंदे चरुभ्यो अपिधातवे । दूर्वाणाꣳस्तंबमाहरैता प्रियतमा मम । इमां दिशं मनुष्याणां भूयिष्ठानुविरोहतु । काशानाꣳस्तंबमाहर रक्षसामपहत्यै । य एतस्यै दिशः पराभवन्नघायवो यथा तेनाभवान्पुनः । दर्भाणाꣳस्तंबमाहर पितॄणामोषधीप्रियाम् । अन्वस्यैमूलं जावीदनुकांडमथोफलं ॥ १ ॥ लोकं पृणता अस्य सूदंदोहसः । शं वातः शꣳहिते घृणिः शमु ते संत्वोषधीः । कल्पन्तां ते दिशः सर्वाः । इदमेव मेतोर्प रामार्तिमाराम कांचन । तथा तदश्विभ्यां कृतं मित्रेण वरुणेन च । वरणो वारयादिदं देवो वनस्पतिः । आर्त्यैनिर्ऋत्यैद्वेषाच्च वनस्पतिः । विधृतिरसि विधारयास्मद्दाद्वेषाꣳसि शमिशमयास्मद्दाद्वेषाꣳसि यव यवयास्मद्दाद्वेषाꣳसि। पृथिवीं गच्छांतरिक्षंगच्छ दिवंगच्छ दिशोगच्छ सुवर्गच्छ सुवर्गच्छ दिशोगच्छ दिवं गच्छांतरिक्षं गच्छ पृथिवीं गच्छापो वा गच्छ यदि तत्र ते हित-

मोषधीषु प्रतितिष्ठाशरीरैः । अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं याराष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु ॥ २ ॥ अथोफलं पुनातु ॥

आरोहतायुर्जरसं गृणाना अनु पूर्वं यतमाना यतिष्ठ । इह त्वष्टा सुजनिमा सुरत्नो दीर्घमायुः करतु जीवसे वः । यथाहान्यनुपूर्वं भवंति यथर्तवं ऋतुभिर्यंति कल्पाः । यथा न पूर्वमपरो जहात्येवाधातरायूंष्यृषि कल्पयैषाम् । न हि ते अग्ने तनुवै क्रूरं चकार मर्त्यः । कपिर्बभस्ति तेजनं पुनर्जरायुगौरिव । अपनः शोशुचदघमग्नेशुशुध्यारयिम् । अपनः शोशुचदघं मृत्यवे स्वाहा । अनड्वाहमन्वारभामहे स्वस्तये । स न इंद्र इव देवेभ्यो वह्निः संपारणो भव ॥ १ ॥ इमे जीवा विमृतैराववर्तन्नभूद्भद्रा देवहूतिर्नो अद्य । प्रांजोगामानृतये हसाय द्राघीय आयुः प्रतरां दधानाः । मृत्योः पदं योपयंतो यदैम द्राघीय आयुः प्रतरं दधानाः । आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवथ यज्ञियासः । इमं जीवेभ्यः परिधिं दधामि मानोनुगादपरो अर्धमेतम् । शतं जीवंतु शरदः पुरूचीस्तिरो मृयुं दधाहे पर्वतेन । इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा संमृशंताम् । अनश्रवो अनमीवाः सुशेवा आरोहंतु जनयो योनिमग्ने । यदांजनं त्रैककुदं जातमहिमवतस्परि । तेनामृतस्य मूलेनारातीर्जंभयामसि । यथा त्वमुद्भिनत्स्योषधे पृथिव्या अधि । एवामिम उद्भिंदंतु कीर्त्यायशसा ब्रह्मवर्चसेन । अजोस्यजास्मद्द्वाद्वेषांसि यवोसि यवयास्मद्द्वा द्वेषांसि॥२॥सपारणो भवजंभयामसि त्रीणिच॥१०॥

अपनः शोशुचदघमग्ने शुशुध्या रयिम् । अपनः शोशुचदघम् । सुक्षेत्रिया सुगातु यावसूया च यजामहे । अपनः शोशुचदघम् । प्रयद्वंदिष्ट एषां प्रास्माकांसश्च सूरयः । अपनः शोशुचदघम् । प्रयदग्नेः सहस्वतो विश्वतो यंति

सूरयः । अपनः शोशुचदघम् । प्रयत्ते अग्ने सूरयो जायेमहिप्रते वयम् । अपनः शोशुचदघम् ॥ १ ॥ त्वꣳ हि विश्वतोमुख विश्वतः परिभूरसि । अपनः शोशुचदघम् । द्विषो नो विश्वतो मुखाति नावेवपारय । अपनः शोशुचदघम् । स नः सिंधुमिव नावयाऽतिपर्षास्वस्तये । अपनः शोशुचदघम् । आपः प्रवणादिव यतीरपास्मत्स्यन्दतामघम् । अप नः शोशुचदघम् । उद्वनादुदकानीवापास्मत्स्यंदतामघम् । अपनः शोशुचदघम् । आनंदाय प्रमोदाय पुनरागाꣳस्वान्गृहान् । अपनः शोशुचदघम् । न वै तत्र प्रमीयते गौरश्वः पुरुषः पशुः । यत्रेदं ब्रह्मक्रियते परिधिर्जीवनाय कमपनः शोशुचदघम् ॥ २ ॥ अघमघं चत्वारिंच ॥ ११ ॥ अपश्याम युवतिमाचरंतीं मृतायं जीवां परिणीयमानाम् । अंधेन या तमसा प्रावृतासि प्राचीमवांचीमवयं नरिष्टये । मयैतां माꣳस्तां म्रियमाणा देवी संती पितृलोकं यदैषि । विश्ववारा नमसा संव्ययंत्युभौ नो लोकौ पयसाऽऽवृणीहि । रयिष्ठामग्निं मधुमंतमूर्णमूर्जः संतं त्वापयसोपसꣳ सदेम । सꣳरभ्या समुवर्चसा सचस्वा नः स्वस्तये । ये जीवाये चं मृता ये जाताये च जंत्याः । तेभ्यो घृतस्य धारातिं मधुधारा व्युंदती । माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानांममृतस्य नाभिः । प्रणुवोचं चिकितुषे जनायमागामनागामदितिं वधिष्ट । पिबंतूदकं तृणान्यत्तु । ॐमुत्सृजत ॥ १ ॥ वधिष्टद्वे चं ॥ १२ ॥ परे युवाꣳ सं प्रविद्वान्भुवनस्याभ्यावृत्स्वाजोभागोयंवैचतुश्चत्वारिꣳशद्य एतस्य त्वत्पंच प्रकेतुनेदं ते नाकेसुपर्णयौ तेये युध्यंते तपसाऽऽमन्वतीरेवतीः सꣳरभध्वमष्टाविꣳशतिर्यते यत्त उत्तिष्ठात इदं त उत्तिष्ठ प्रेह्यमन्यद्वा उद्वयमयं पंचविꣳशतिरायातु त्रिꣳशद्वैश्वानरेतस्मिन् द्रप्सइममपतोहोभिर्युज्यतामग्निया अदिते

पारं व आप्यायस्व सप्तविंशतिरुत्तेभ्नोम्यक्षितिस्तेभ्यः पृथिविषद्धा ता परं मेशग्मा:पृथिव्याअंतरिक्षस्यद्वात्रिंशदपूपवानसौ दशशत दंशैतास्ते ते दिशः सर्वाः (पृथिवींगच्छा) अश्मन्यद्वैविंशतिरारोहत तनुवै क्रूरं चकार पुनर्मृत्यवे मानोनुगाद्वधह इमा नारीः परि त्रयोविंशतिरंप नः सुक्षेत्रिया प्रयङ्कंदिष्टः प्रयदग्नेः प्रयत्ते अग्ने त्वंहि द्विषः सनः सिंधुमापः प्रवणा दुंदुनादानं दायन वैतत्रचतुर्विंश शतिरपंश्यामावृणीहि द्वादशद्वादश परेयु वांसमाया त्वेतास्तेसप्तविंशतिः ॥ २७ ॥ सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च। ॐ शान्तिः शान्तिः शांतिः ॥ हरिः ॐ ॥

हरिःॐ । शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्व (त्वा)मेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शांतिः शांतिः शांतिः । सत्यं वदिष्यामि पञ्च च॥ॐशीक्षां व्याख्यास्यामः। वर्णःस्वरः । मात्रा बलम् । सामं सन्तानः । इत्युक्तः शीक्षाध्यायः ॥ १ ॥ शीक्षां पंचं ॥ १ ॥ सह नौ यशः । सहनौ ब्रह्मवर्चसम् । अथातः संहिताया उपनिषदं व्याख्यास्यामः । पंचस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासंहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः संधिः ॥ १ ॥ वायुः संधानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः संधिः । वैद्युतः संधानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥ २ ॥ अंतेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनं

संधानम्। इत्यधिविद्यम्। अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा संधिः। प्रजननꣳसंधानम्। इत्यधिप्रजम् ॥ ३ ॥ अथाध्यात्मम्। अधराहानुः पूर्वरूपम्। उत्तराहनुरुत्तररूपम्। वाक्संधिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। संधीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन ॥ ४ ॥ सन्धिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥ २ ॥ यश्छंदसामृषभो विश्वरूपः। छंदोभ्योऽध्यमृतात्संबभूव। समेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधयाऽपिहितः। श्रुतम्मे गोपाय। आवहंती वितन्वाना ॥ १ ॥ कुर्वाणा चीरमात्मनः। वासाꣳसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। आमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणःस्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा ॥ १ ॥ यशो जनेऽसानि स्वाहा। श्रेयान्वस्यसोसानि स्वाहा। तंत्वाभग प्रविशानि स्वाहा। समाभगप्रविश स्वाहा। तस्मिन्त्सहस्रशाखे। निर्भगाहं त्वयि मृजे स्वाहा। यथापः प्रवतायन्ति। यथामासा अहर्जरम्। एवं मां ब्रह्मचारिणः। धातरायंतु सर्वतः स्वाहा। प्रातिवेशोऽसि प्रमाभाहि प्रमापद्यस्व ॥ २ ॥ वितन्वानाशमायंतु ब्रह्मचारिणः स्वाहा धातरायंतु सर्वतः स्वाहैकंच ॥ ३ ॥ भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामुहस्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। महइति। तद्ब्रह्म। स आत्मा। अंगान्यन्या देवताः। भूरिति वा

अयं लोकः । भुव इत्यंतरिक्षम् । सुवरित्यसौ लोकः ॥ १ ॥ मह इत्यादित्यः । आदित्येन वाव सर्वे लोकामहीयंते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चंद्रमाः । चंद्रमसा वाव सर्वाणि ज्योतींषि महीयंते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि ॥ २ ॥ मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयंते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयंते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । तायो वेदं । स वेदं ब्रह्म । सर्वेस्मै देवा वलिमावहंति ॥ ३ ॥ असौ लोको यजूंषि वेदं ब्रूचं ॥ ४ ॥ स यएषोंतर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतोहिरण्मयः । अंतरेण तालुके । य एष स्तन इवावलंबते । सेन्द्रयोनिः । यत्रासौ केशांतो विवर्तते । व्यपोह्यशीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥ १ ॥ सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्मप्राणारामं मन आनन्दम् । शांतिसमृद्धममृतम् । इति प्राचीनयोग्योपास्व ॥ २ ॥ वायावमृतमेकंच ॥ ५ ॥ पृथिव्यंतरिक्षं द्यौर्दिशो वांतरदिशाः । अग्निर्वायुरादित्यश्चंद्रमा नक्षत्राणि । आपओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनोवाक्त्वक् । चर्ममांसस्नावास्थिमज्जा । एतदधिविधाय ऋषिरवोचत् । पांक्तं वा इदꣳ सर्वम् । पांक्तेनैव पांक्तꣳस्पृणोतीति ॥ १ ॥ सर्वमेकं च ॥ ६ ॥ ओमितिब्रह्म । ओमितीदꣳसर्वं । ओमित्येतदनुकृतिहस्मवा अप्योश्रावयेत्या-

श्रावयंति। ओमिति सामानि गायंति। ओꣳशोमिति शस्त्राणि शꣳसंति। ओमित्यध्वर्युः प्रतिगरं प्रति गृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति॥ १॥ ॐ दश॥ ७॥ ऋतं च स्वाध्यायप्रवचनेच। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचने च। अग्निहोत्रं च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषं च स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च॥ १॥ प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च। सत्यमिति सत्यवचाराधीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥ २॥ प्रजा च स्वाध्यायप्रवचने च षट्च॥ ८॥ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि। द्रविणꣳ सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशंकोर्वेदानुवचनम्॥ १॥ अहꣳ षट्॥९॥ वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियंधनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यान्न प्रमदितव्यम्॥१॥ देवपितृकार्याभ्यान्न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भवायान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि॥ २॥ नो इतराणि। ये केचास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयासनेन

प्रश्वासितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥ ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामा स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामा स्युः । यथाते तेषु वर्तेरन् । तथा तेषुवर्तेथाः । एष आदेशः । एष उपदेशः । एषावेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ ४ ॥ स्वाध्यायप्रवचनाभ्यान्नप्रमदितव्यम् तात्त्विवयो'पास्यानिस्यात्तेषुवर्त्तेरन्त्सप्तच ॥१०॥ शन्नो मित्रः शंवरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रोबृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐशांतिः शांतिः शांतिः ॥ १ ॥ सत्यमवादिषं पंचच ॥ ११ ॥ शन्नः शीक्षाꣳ सहनौयश्छन्दसांभूः सयः पृथिव्योमित्यृतं चाहं वेदमनूच्य शन्नोद्वादंश ॥ १२ ॥ शन्नो मह इत्यादित्योनो इतराणि त्रयो'विꣳशतिः ॥ ॥ २३ ॥ शन्नो मित्रः शंवरुणः । ॐशांतिः शांतिः शांतिः । हरीः ॐ ॥ हरिःॐ । सहनाववतु । सहनौ भुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तु माविद्विषावहै । ॐशांतिः शांतिः शान्तिः । ॐ ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽनुते सर्वान्कामान्सह । ब्रह्मणा विपश्चितेति । तस्मा द्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः ।

अद्भ्यःपृथिवी । पृथिव्या ओषधयः । ओषधीभ्योन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोकोभवति ॥१॥ अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्चपृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपियन्त्यन्ततः । अन्नꣳहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वैतेन्नमाप्नुवन्ति । येन्नं ब्रह्मोपासते । अन्नꣳहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धते । अद्यतेऽत्तिच भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात्।अन्योन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः तस्य प्राणं एव शिरः। व्यानो दक्षिणः पक्षः।अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ २ ॥ प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते । सर्वमेवत आयुर्यंति । ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्यपुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥३॥ यतो वाचो निवर्तते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् । अन्योन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा

ACADEMY OF ... LEGISLATION
MEL ... RARY
Acc. No. 200
Date ...

एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ ४ ॥ विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान्त्समश्नुत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योन्तर आत्मानन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ ५ ॥ असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उता विद्वानमुं लोकं प्रेत्य। कश्चन गच्छति। आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता इ उ। सोऽकामयत। बहुस्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदꣳ सर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्। यदिदं किंच। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति ॥ ६ ॥ असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानꣳ स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै सः। रसꣳ ह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति। यदा ह्येवैष एतस्मिन्नदृश्येऽनात्मेऽनिरुक्ते

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431

ऽनिलयने ऽभयं प्रतिष्ठां विंदते। अथ सोभयं गतो भवति।यदाह्येवैष एतस्मिन्नु दरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषो मन्वानस्य । तदप्येष श्लोको भवति ॥ ७ ॥ भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पंचम इति । सैषानंदस्य मीमांसा भवति । युवा स्यात्साधु युवाध्यायकः । आशिष्ठो द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मानुषा आनंदाः । स एको मनुष्यगंधर्वाणामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगंधर्वाणामानंदाः । स एको देवगंधर्वाणामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगंधर्वाणामानंदाः । स एकः पितृणां चिरलोकलोकानामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोकलोकानामानंदाः । स एक आजानजानां देवानामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानंदाः। स एकः कर्मदेवानां देवानामानन्दःये कर्मणा देवानपि यंति। श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानंदाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्यानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानंदाः। स एकः बृहस्पतेरानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानंदाः । स एकः प्रजापतेरानंदः । श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानंदाः । स एको ब्रह्मण आनंदः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोम-

यमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानंद-मयमात्मानमुपसंक्रामति । तदप्येष श्लोको भवति ॥ ८ ॥ यतो वाचो निवर्तंते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतꣳ हवा वं न तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानꣳ स्पृणुते । उभे ह्येवैष एते आत्मानꣳ स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ ९ ॥ सहनाववतु० ॥ ॐशांतिः शांतिः शांतिः । हरिः ॐ ॥

ॐसह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ॐशांतिःशांतिःशांतिः । हरिःॐ । भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तꣳहोवाच । यतो वा इमानि भूतानि जायंते । येन जातानि जीवंति । यत्प्रयंत्यभिसंविशंति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोतप्यत । स तपस्तप्त्वा ॥ १ ॥ अन्नं ब्रह्मेति व्यजानात् । अन्नाध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशंतीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳहोवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोतप्यत । स तपस्तप्त्वा ॥ २ ॥ प्राणो ब्रह्मेति व्यजानात् । प्राणाध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳहोवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोतप्यत । स तपस्तप्त्वा ॥ ३ ॥ मनो ब्रह्मेति व्यजा-

नात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयंत्यभिसंविशंतीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। सतपोतप्यत। स तपस्तप्त्वा ॥४॥ विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेनजातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशंतीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोतप्यत। स तपस्तप्त्वा॥५॥आनंदो ब्रह्मेति व्यजानात्। आनंदाध्येव खल्विमानि भूतानि जायन्ते। आनंदेन जातानि जीवन्ति। आनन्दं प्रयंत्यभिसंविशंतीति। सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या ॥ ६ ॥ अन्नं न निंद्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या ॥ ७ ॥ अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या ॥ ८ ॥ अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता।

तदेतदन्नमन्ने प्रतिष्ठितं । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या९॥ न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया वह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोन्नꣳराद्धम् । मुखतोस्मा अन्नꣳराध्यते । एतद्वै मध्यतोन्नꣳराद्धम् । मध्यतोस्मा अन्नꣳराध्यते । एतद्वा अंततोन्नꣳराद्धम् । अंततोस्मा अन्नꣳराध्यते । य एवं वेद । क्षेमइति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इतिपशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानंद इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान्भवति । तन्नम इत्युपासीत । नम्यंतेस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियंते द्विषंतः सपत्नाः । परियेंता भ्रातृव्याः । सयश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानंदमयमात्मानमुपसंक्रम्य । इमा ३ न्लोका ३ न्कामा ३ न्नीकामरूप्यनुसंचरन् । एतत्सामगायन्नास्ते । हा ३ वूहा ३ वूहा ३ वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादो ३ हमन्नादो ३ हमन्नादः । अहꣳश्लोककृदहꣳश्लोककृदहꣳश्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३

भा३यि। योमाददाति सइ देवमा ३ वा३:। अहमन्नमन्नमदंतमा ३ द्मि। अहं विश्वं भुवनमभ्यभवाम्। सुवर्ण्ज्योतीः। य एवं वेद। इत्युपनिषत्॥१०॥

सहनाववतु। ० ॐशांतिः शांतिः शांतिः। हरिः ॐ श्रीकृष्णार्पणमस्तु।

ॐसहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहै। तेजस्विनावधीतमस्तुमाविद्विषावहै। ॐ शांतिःशांतिःशांतिः। हरिः ॐ। अर्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्। शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति गर्भेअंतः। यस्मिन्निदꣳ संचविचैति सर्वं यस्मिन्देवा अधिविश्वे निषेदुः। तदेव भूतं तदुभव्यमा इदं तदक्षरे परमे व्योमन्। येनावृतं खंच दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यमंतःसमुद्रे कवयो वयंति यदक्षरे परमे प्रजाः। यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यसर्सर्ज भूम्यांम्।यदोषधीभिः पुरुषान्पशूꣳश्च विवेश भूतानि चराचराणि। अतः परन्नान्यदणीयसꣳहि परात्परं यन्महतो महांतम्। यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसःपरस्तात् ॥१॥ तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्। इष्टापूर्तं बहुधाजातं जायमानं विश्वंबिभर्तिभुवनस्य नाभिः। तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः। तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः।सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः। अर्धमासा मासा ऋतवः संवत्सरश्च कल्पताम्। स आपः प्रदुधे उभे इमे अंतरिक्षमथो सुवः। नैनमूर्ध्वन्नतिर्यं चन्नमध्येपरिजग्रभत्। न तस्येशे कश्चन तस्य नाम महद्यशः॥ २॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्। हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवंति। अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ। एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः

स उ गर्भे अंतः । स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखांस्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन्देव एकः । वेनस्तत्पश्यन्निश्चाभुवनानि विद्वान्यत्र विश्वं भवत्येकनीळम् । यस्मिन्निदꣳ सं च विचैकꣳ स ओतः प्रोतश्च विभुः प्रजासु । प्रतद्वोचे अमृतन्नु विद्वान्गन्धर्वोनाम निहितं गुहासु ॥ ३ ॥ त्रीणि पदा निहिता गुहासु,यस्तद्वेद सवितुः पितासत् । स नो बंधुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवा अमृतमानशानास्तृतीये धामन्यध्यैरयंत । परि द्यावा पृथिवी यंति सद्यः परिलोकान्परिदिशः परिसुवः। ऋतस्य तंतुंवितत विचृत्य तदपश्यत्तदभवत्प्रजासु । परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभिसंबभूव । सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यम् । सनिंमेधामयासिषम् । उद्दीप्यस्व जातवेदोपप्रन् निर्ऋतिम् मम ॥ ४ ॥ पशूꣳश्च मह्यमावह जीवनं च दिशो दिश । मानो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत् । अविभ्रदग्न आगहि श्रिया मा परिपातय । पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि । तन्नोदंतिः प्रचोदयात् । तत्पुरुषाय विद्महे चक्रतुंडाय धीमहि ॥ ५ ॥ तन्नो नंदिः प्रचोदयात् । तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् । तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् । नारायणाय विद्महे वासुदेवाय

धीमहि । तन्नो विष्णुः प्रचोदयात् । वज्रनखाय विद्महेतीक्ष्णदंष्ट्राय धीमहि ।
॥ ६ ॥ तन्नो नारसिंहः प्रचोदयात् । भास्कराय विद्महे महद्युतिकराय
धीमहि । तन्नो आदित्यः प्रचोदयात् । वैश्वानरायविद्महे लीलालाय धीमहि ।
तन्नो अग्निः प्रचोदयात् । कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो
दुर्गिः प्रचोदयात् । सहस्रपरमा देवी शतमूला शतांकुरा । सर्वं हरतु मे
पापं दूर्वा दुस्वप्ननाशिनी । कांडात्कांडात्प्ररोहंती पुरुषः पुरुषः परि ॥ ७ ॥
एवानो दूर्वे प्रतनु सहस्रे'ण शतेन च । या शतेन प्रतनोषि' सहस्रे'ण विरो-
हसि । तस्यास्ते देवीष्टके विधेम हविषा वयं । अश्वक्रांते रथक्रांते विष्णुक्रांते
वसुंधरा । शिरसा धारयिष्यामि रक्षस्व मां पदेपदे । भूमिर्धेनुर्धरणी लोक-
धारिणी । उद्धृतासि वराहेण कृष्णेन शतबाहुना । मृत्तिके हन मे पापं यन्मया
दुष्कृतं कृतम् । मृत्तिके' ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता । मृत्तिके' देहि मे
पुष्टिं त्वयिसर्वं प्रतिष्ठितम् ॥ ८ ॥ मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।
तया हतेन पापेन गच्छामि परमां गतिं । यतं इंद्र भयामहे ततोनो अभयं
कृधि । मघवंछग्धि तवतन्नऊतये विद्विषो विमृधो' जहि । स्वस्तिदा विशस्प-
तिर्वृत्रहा विमृधो' वशी । वृषेंद्रः पुर एतु नः स्वस्तिदा अभयं करः । स्वस्तिन
इंद्रोवृद्धःश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु । आपांतमन्युस्तृपलप्रभर्माधुनिः शिमीवां छरुमा-
ऋजीषी । सोमो विश्वान्यतसावनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥ ९ ॥
ब्रह्मं जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो' वेन आवः । सबुध्नियां उपमा
अस्य विश्वाः सतश्च योनिमसंतश्च विवः । स्योना पृथिवि भवानृक्षरानि-
वेशनी । यच्छानः शर्मसप्रथाः । यंधद्वारां दुराधर्षांनित्यपुष्टां करीषिणीं ।

ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् । श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु । विष्णुमुखा वै देवाश्छंदोभिरिमान्लोकाननपजय्यमभ्यजयन् । महाꣳ इंद्रो वज्रबाहुः षोडशीशर्म यच्छतु॥१०॥ स्वस्ति नो मघवा करोतु हंतु पाप्मानं योऽस्मान्द्वेष्टि । सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्त य औशिजम् । शरीरं यज्ञशमलं कुसीदं तस्मित्सीदतुयोऽस्मान्द्वेष्टि । चरणं पवित्रं विततं पुराणं येन पूतस्तरतिदुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अतिपाप्मानमरातिं तरेम । सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहच्छूर विद्वान् । जहि शत्रूꣳरपमृधो नुदस्वाथाभयं कृणुहि विश्वतो नः । सुमित्रा न आप ओषधयः संतु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आपो हिष्ठामयोभुवस्ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते हनः । उशतीरिव मातरः । तस्मा अरं गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः । नमोऽग्नये ऽसुमते नम इंद्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥ १२ ॥ यदपाक्रं यदमेध्यं यदशांतं तदपगच्छतात् । अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् । तन्नो वरुणो राजा पाणिना ह्यवमर्शतु । सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्म सलोकताम् । यश्चाप्सु वरुणः सपुनात्वघमर्षणः । इमं मे गंगे यमुने सरस्वति शुतुद्रिस्तोमꣳसचतापरुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्यासुषोमया । ऋतं च सत्यं चाभीद्धात्तपसोऽध्य-

जायत। ततो रात्रिरजायत। ततः समुद्रो अर्णवः ॥ १३ ॥ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो सुवः। यत्पृथिव्याꣳरजस्वमांतरिक्षे विरोदसी। इमाꣳस्तदापो वरुणः पुनात्वघमर्षणः। पुनंतु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम्। द्यावापृथिव्यो र्हिरण्मयꣳ सꣳश्रितꣳ सुवः ॥ १४ ॥ सनः सुवः सꣳशिशाधि। आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। यो हमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहा। अकार्यकार्यवकीर्णिस्तेनो भ्रूणहा गुरुतल्पगः। वरुणोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते। रजोभूमिस्त्वमाꣳ रोदयस्व प्रवदन्ति धीराः। आक्रांतसमुद्रः प्रथमे विधर्मन जनयन्प्रजाभुवनस्य राजा। वृषा पवित्रे अधिसानो अव्ये बृहत्सोमो वावृधे सुवान इंदुः ॥ १५ ॥ परस्ताद्यशो गुहासु मम चक्रंतुयाडं धीमहि तीक्ष्णेदꣳष्ट्राय धीमहि परिप्रतिष्ठंतदेभुर्यच्छतुदधातनाद्भयो अर्णवः सुवोराजैकंच। १। रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च। गरुडो ब्रह्मविष्णुश्च नारसिꣳहस्तथैवच। आदित्यो ग्निश्चदुर्गिश्च क्रमेण द्वादशांभसि। ममवचमसुवे नावभावै कात्यायनाय ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। सनः पर्षदतिदुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः। तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीꣳशरणमहं प्रपद्ये सुतरसि तरसे नमः। अग्ने त्वं पारयानव्यो अस्मात्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवातोकायतनयाय शंयोः।विश्वानि नो दुर्गहाजात-

वेदः सिन्धुं न नावा दुरितातिपार्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् । पृतनाजित्सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् । सनः पर्षदतिदुर्गाणि विश्वाक्षामद्देवो अतिं दुरितात्यग्निः । प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्चसत्सि । स्वांचाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व । गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनु संचरेम । नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयंताम् ॥ १ ॥ अग्निश्चत्वारिं च ॥ २ ॥ भूरन्नमग्नये पृथिव्यै स्वाहा भुवोन्नं वायवेन्तरिक्षाय स्वाहा सुवरन्नमादित्यायं दिवे स्वाहा भूर्भुवः सुवरन्नं चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमोम् ॥१॥ भूरग्नये पृथिव्यै स्वाहा भुवो वायवेन्तरिक्षाय स्वाहा सुवरादित्यायं दिवे स्वाहा भूर्भुवः सुवश्चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरग्न ॐ ॥ २ ॥ भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा सुवरादित्यायं च दिवे च महते च स्वाहा भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवर्महरोम् ॥ ३ ॥ पाहि नो अग्न एनसे स्वाहा । पाहिनो विश्ववेदसे स्वाहा । यज्ञं पाहि विभावसो स्वाहा । सर्व पाहि शतक्रतो स्वाहा ॥ ४ ॥ पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाह्यूर्जं तृतीयया । पाहि गीर्भिश्चतसृभिर्वसो स्वाहा ॥ ५ ॥ यश्छन्दसामृषभो विश्वरूपश्छंदोभ्यश्छंदांस्याविवेश । स चा शिक्यः पुरो वाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ॐ ॥ ६ ॥ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता

भूयासं कर्णयोः श्रुतं माच्योर्ब्रह्ममामुष्य ॐ ॥ ७ ॥ ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥ ८ ॥ यथा वृक्षस्य संपुष्पितस्य दूरादूर्ध्वो वात्येवं पुण्यस्य कर्मणो दूरादूर्ध्वो वाति यथासिधारां कर्तेवं हितामवक्रामे यद्युवेयुवेहवाविह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत ॥ ९ ॥ अणोरणीयान्महतो महीयानात्मा गुहायान्निहितोस्य जंतोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् । सप्त प्राणाः प्रभवंन्ति तस्मात्सप्तार्चिषः समिधः सप्तजिह्वाः । सप्त इमे लोका येषु चरंन्ति प्राणा गुहाशयान्निहिताः सप्तसप्त । अतः समुद्रा गिरयश्च सर्वेस्मात्स्यन्दंन्ते सिन्धवः सर्वरूपाः । अतश्च विश्वा ओषधयो रसाश्चयैनैष भूतैस्तिष्ठत्यंतरात्मा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाꣳस्वधितिर्वनानाꣳ सोमः पवित्रमत्येतिरेभन् । अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं ꣳ सरूपाम् । अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥ १ ॥ हꣳसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । घृतस्मिमिक्षिरेघृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम । अनुष्वधमावहमादयंस्व स्वाहा कृतं वृषभ वक्षि हव्यम् । समुद्रादूर्मिमधुमा ꣳ उदारदुपाꣳशुनासममृतत्वमानट् । घृतस्य नामगुह्यं यदस्ति जिह्वादेवानाममृतस्य नाभिः । वयन्नामप्रब्रवामाघृतेनास्मिन् यज्ञे धारयामा नमोभिः । उपब्रह्मा शृणवच्छस्यमानं चतुः शृंगोवमीद्गौर एतत् । चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो

रोरवीति महोदेवो मर्त्या ५ आविवेश ॥ २ ॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एक ५ सूर्य एकं जजान वेनादेक ५ स्वधया निष्टतक्षुः । यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमान ५ स नो देवः शुभया स्पृत्या संयुनक्तु । यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकन्निहितं गुहायां विभ्राजते यद्यतयो विशन्ति । वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे । दहं विपापं परमेश्वभूतं यत्पुंडरीकं पुरमध्यस ५ स्थम् । तत्रापि दहं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यम् । यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः समहेश्वरः ॥ ३ ॥ अजो न्य आविवेश सर्वे चत्वारि च ॥ ३ ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वन्नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वन्नारायण ५ हरिं । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वर ५ शाश्वत ५ शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरं ब्रह्मतत्त्वन्नारायणः परः । नारायणपरो ध्याता ध्यानन्नारायणः परः । यच्च किंचिज्जगत्सर्वं दृश्यतेश्रूयतेपि वा ॥ १ ॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणस्थितः । अनन्तमव्ययं कविं ५ समुद्रेऽन्तं विश्वशंभुवम् । पद्मकोशप्रतीकाश ५ हृदयं चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाति विश्वस्यायतनं महत्

सन्ततश्सिराभिस्तु लंबत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳसूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्निर्विश्वार्चीर्विश्वतो मुखः । सोग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः । तिर्यगूर्ध्वमधः शायी रश्मयस्तस्यसन्ततः। सन्तापयति स्वन्देहमापादतलमस्तकम् । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखायामध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिवः स हरिः सेन्द्रः सोक्षरः परमः स्वराट् ॥२॥ अपि-वासंतताषट्चं ॥ ४ आदित्यो वा एष एतन्मण्डलं तपति तत्रता ऋचस्तद्दृचांमंडलꣳस ऋचां लोकेऽथ य एष एतस्मिन्मंडलेर्चिर्दीप्यते तानि सामानि ससाम्नां लोकोथ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्तानि यजूꣳषि स यजुषां मंडलꣳस यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये हिरण्मयः पुरुषः ॥ १ ॥ आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तत्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयंभुब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ स लोकतामाप्नोत्येतासामेवदेवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् ॥ १ ॥ निधनपतये नमः । निधनपतांतिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः ।

परमाय नमः । परमलिङ्गाय नमः । एतत्सोमस्य सूर्यस्य सर्वलिङ्गस्थाप-यति पाणिमन्त्रं पवित्रम् । सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमोनमः । भवेभवेनातिभवेभवस्वमाम् । भवोद्भवाय नमः । वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलवि-करणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनो-न्मनाय नमः । अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्म-णोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् । नमो हिरण्यबाहवे हिरण्यव-र्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः । ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमोनमः । सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु । कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंतमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु । यस्य वैकंकत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठंत्यथो प्रतिष्ठित्यै । कृणुष्व पाज इति पंच ॥ १ ॥ अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ सर्वभू-तानां मातामेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वाभूता कतमा काया सा सत्येत्यमृतेति वसिष्ठः ॥ १ ॥ आपो वा इदꣳ सर्वं विश्वाभूतान्यापः प्राणा वा आपः पशव आपोन्नमापोमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्यापः

सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ॐ ॥ १ ॥ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु माम्। पुनंतु ब्रह्मणस्पतिर्ब्रह्मा पूता पुनातु माम्। यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनंतु मामापो सतांऽचं प्रतिग्रहꣳस्वाहा ॥ २ ॥ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंताम्। यदह्ना पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुंपतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ३ ॥ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंताम्। यद्रात्रिया पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुंपतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ। सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ४ ॥ ओमित्येकाक्षरं ब्रह्म। अग्निर्देवता ब्रह्मा इत्यार्षम्। गायत्रं छन्दः परमात्मं सरूपम्। सायुज्यं विनियोगम्। आयातु वरदा देवी अक्षरंब्रह्मसंमितम्। गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे। यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते। यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते। सर्ववर्णे महादेविसंध्या विद्ये सरस्वति। ओजोसि सहोसि बलमसि भ्राजोसि देवानाम्। धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छन्दऋषीनावाहयामि श्रियमावाहयामि गायत्रिया गायत्रीछन्दो विश्वामित्रऋषिः सविता देवताभिर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳरुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमानासप्राणाश्चेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशीर्षोपनयने विनियोगः। ॐभूः। ॐभुवः। ॐꣳसुवः। ॐमहः। ॐजनः।

ॐतपः । ॐ सत्यम् । ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योतीरसोमृतं ब्रह्म भूर्भुवः सुवरोम् । उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योभ्यनुज्ञाता गच्छ देवि यथासुखम् । स्तुता मया वरदा वेदमाता प्रचोदयंती पवने द्विजाता । आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा प्रजातुं ब्रह्मलोकम् ॥ १ ॥ घृणिः सूर्य-आदित्यो न प्रभावात्यक्षरम् । मधु क्षरंति तद्रसम् । सत्यं वै तद्रसमापोज्योतीरसोमृतं ब्रह्म भूर्भुवः सुवरोम् ॥ १ ॥ ब्रह्म मेतुमाम् । मधुमेतु माम् । ब्रह्ममेव मधुमेतु माम् । यास्ते सोम प्रजावत्सोभिसोअहम् । दुःस्वप्नहं दुरुष्वह । यास्ते सोम प्राणाश्स्तान्जुहोमि । त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णी पठन्ति । ते सोमं प्रप्रुवंति । आसहस्रात्पाङ्क्तं पुनन्ति । ॐ ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधुमेधया । अद्यानोदेव सवितः प्रजावत्सावीः सौभगम् । परादुःष्वप्न्यंसुव । विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्म आसुव । मधुवाता ऋताय ते मधुक्षरंति सिंधवः । माध्वीर्नःसंत्वोषधीः । मधुनक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवंतु नः । य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नंति । ये ब्राह्मणास्त्रिसुपर्णीपठंति । ते सोमं प्रप्रुवंति । आसहस्रात्पंक्तिं पुनंति । ॐ ब्रह्ममेधवा । मधु मेधवा । ब्रह्ममेव मधुमेधवा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येतिरेभन् । हꣳसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा

गोजाऋतजाअद्रिजाऋतं बृहत् । ऋचे त्वा रुचे त्वा समित्स्रवंति सरितो न धेनाः । अंतर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि । हिरण्ययो वेतसो मध्यआसाम् । तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्यासते हरयः सप्ततीरे स्वधां दुहाना अमृतस्य धाराम् । य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते घ्नंति । ये ब्राह्मणास्त्रिसुपर्णं पठंति । ते सोमं प्राप्नुवंति । आसहस्रात्पंक्तिं पुनंति । ॐ ॥ १ ॥ मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः । त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विंदते वसुसानो जुषस्व द्रविणो नमेधे । मेधां म इंद्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । अप्सरासु च या मेधा गंधर्वेषु च यन्मनः । दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताꣳस्वाहा । आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषंताम् । मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ १ ॥ अपैतु मृत्युरमृतन्न आगन्वैवस्वतो नो अभयं कृणोतु । पर्ण वनस्पतेरिवाभिनः शीयताꣳरायिः सचतान्नः शचीपतिः । परं मृत्यो अनुपरेहि पंथां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजाꣳरीरिषो मोतवीरान् । वातं प्राणं मनसान्वारभामहे प्रजापतिं यो भुवनस्य गोपाः । स नो मृत्योस्त्रायतां पात्वꣳहसो ज्योग्जीवाजरमꣳशीमहि । अमुत्र भूयादधयद्यमस्य बृहस्पते अभिशस्ते रमुंचः । प्रत्यौहतामश्विना

मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः । हरिꣳहरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनाम् । ब्रह्मसरूपमनुमेदमागादयनं माविवधीर्विक्रमस्व । शल्कैरग्निमिंधान उभौ लोकौ संनेमहम् । उभयोर्लोकयोः ऋध्वातिमृत्युं तराम्यहम् । माछिदो मृत्यो मावधीर्मा मे बलं विवृहो मा प्रमोषीः । प्रजां मामे रीरिष आयुरुग्र नृचक्षसं त्वा हवि्षा विधेम । मानो महांतमुत मानो अर्भकं मान उक्षंतमुतमानं उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रियामानस्तनुवो रुद्ररीरिषः । मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः । वीरान्मा नो रुद्रभामितो वधीर्हविष्मंते नमसा विधेम ते । प्रजापते नत्वदेतान्यन्यो विश्वाजातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳस्याम पतयोरयीणाम् । स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयं करः । त्रियंबकं यजामहे सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् । ये ते सहस्रमयुतं पाशा मृत्योमर्त्याय हंतवे । तान् यज्ञस्यमायया सर्वानवयजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ १ ॥ देवकृतस्यैनसोवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोवयजनमसि स्वाहा । पितृकृतस्यैनसोवयजनमसि स्वाहा । आत्मकृतस्यैनसोवयजनमसि स्वाहा । अन्यकृतस्यैनसोवयजनमसि स्वाहा । अस्मत्कृतस्यैनसोवयजनमसि स्वाहा । यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यद्दिद्वाꣳसश्चाविद्वाꣳसश्चैनश्चकृमतस्यावयजनमसि स्वाहा । एनस एनसोवयजनमसि स्वाहा । यद्वो देवाश्चकृम जिह्वया गुरुमतंसो वा

प्रयुतीदेवहेडनम्। अरावायोनो' अभिदुच्छुनायते तस्मिन्तदेनो' वसवो निधे'-तनस्वाहा ॥ १ ॥ कामोकाऋषीन्नमोनमः । कामोकाऋषीत्कामः करोति नाहं करोमि कामः कर्त्ता नाहं कर्ता कामः कारयिता नाहंकारयिता एष ते कामकामाय स्वाहा ॥ ६१ ॥ मन्युरकाऋषीन्नमोनमः । मन्युरकाऋषीन्मन्युः करोति नाहंकरोमि मन्युः कर्ता नाहंकर्ता मन्युः कारयिता नाहं' कारयिता एष ते मन्यो मन्यवे स्वाहा ॥६२॥ तिलान्जुहोमि सरसाꣳसपिष्टानां धारमम चित्तेरमन्तुस्वाहा। गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳश्रियै स्वाहा । श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रजाः संददातु स्वाहा ॥ ६३ ॥ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वसानुगाः । तिलाः पुनंतु मे पापं यत्किंचिदुरितं मयि स्वाहा । चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः । गोस्तेयꣳ सुरापानं भ्रूणहत्या तिलाशांतिꣳशमयन्तु स्वाहा । श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धा मेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥ ६४ ॥ प्राणापान व्यानोदानसमानां मे' शुध्यंतां ज्योतिरहं विरजाविपाप्मा भूयासꣳस्वाहा । वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिःसंकल्पा मे' शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे' शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा । शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे' शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा । उत्तिष्ठ पुरुष हरितपिंगललोहिताक्षि देहिदेहि ददापयिता मे' शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । पृथिव्यापस्तेजोवायुराकाशा मे' शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा । शब्द-

स्पर्शरूपरसगन्धा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा । अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजाविपाप्मा भूयासꣳस्वाहा । आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । परमात्मा मे शुध्यंतां ज्योतिरहं विरजाविपाप्माभूयासꣳस्वाहा । क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविट्यै स्वाहा । ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । क्षुत्पिपासामलांज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा । अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥६६॥ अग्नये स्वाहा । विश्वेभ्यो देवेभ्यस्वाहा । ध्रुवाय भूमायस्वाहा । ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृतेस्वाहा । धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यः स्वाहा । ओषधिवनस्पतिभ्यः स्वाहा ॥१॥ रक्षोदेवजनेभ्यः स्वाहा । गृह्याभ्यः स्वाहा । अवसानेभ्यः स्वाहा । अवसानपतिभ्यः स्वाहा । सर्वभूतेभ्यः स्वाहा । कामाय स्वाहा । अंतरिक्षाय स्वाहा । यदेजति जगति यच्च चेष्टति नाग्नेर्भागो यन्नाग्ने स्वाहा । पृथिव्यै स्वाहा । अंतरिक्षाय स्वाहा ॥ २ ॥ दिवे स्वाहा । सूर्याय स्वाहा । चन्द्रमसे स्वाहा । नक्षत्रेभ्यः स्वाहा । इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा । स्वधापितृभ्यः स्वाहा । नमो रुद्राय पशुपतये स्वाहा ॥ ३ ॥ देवेभ्यः स्वाहा । पितृभ्यः स्वधास्तु । भूतेभ्यो नमः । मनुष्येभ्यो हन्त । प्रजापतये स्वाहा । परमेष्ठिने स्वाहा । यथा कूपः शतधारः सहस्रधारो अक्षितः । एवा मे अस्तु धान्यꣳ

सहस्रधारमक्षितम् । धनधान्ये स्वाहा । ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छंतो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहा ॥ ४ ॥ ओषधिवनस्पतिभ्यस्वाहान्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा वितुदस्य प्रेष्या एकं च ॥ ६५ ॥ ॐतद्ब्रह्म । ॐतद्वायुः । ॐतदात्मा । ॐतत्सत्यम् । ॐतत्सर्वम् । ॐतत्पुरोनमः । अंतश्चरतिभूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवः सुवरोम् ॥ ६६ ॥ श्रद्धायां प्राणेनिविष्टोऽमृतं जुहोमि । श्रद्धायामपाने निविष्टोऽमृतंजुहोमि । श्रद्धायां व्यानेनिविष्टोमृतं जुहोमि । श्रद्धायामुदाने निविष्टोमृतं जुहोमि । श्रद्धायाꣳसमाने निविष्टोमृतंजुहोमि । ब्रह्मणि म आत्मामृतत्वाय । अमृतोपस्तरणमसि । श्रद्धायां प्राणे निविष्टोमृतंजुहोमि । शिवोमाविशाप्रदाहाय प्राणायस्वाहा । श्रद्धायामपाने निविष्टोमृतंजुहोमि । शिवो माविशाप्रदाहाय अपानायस्वाहा । श्रद्धायां व्याने निविष्टोमृतं जुहोमि । शिवोमाविशाप्रदाहाय । व्यानायस्वाहा । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । शिवोमाविशाप्रदाहाय । उदानाय स्वाहा । श्रद्धायाꣳसमाने निविष्टोमृतंजुहोमि । शिवोमाविशाप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्मामृतत्वाय । अमृतापिधानमसि ॥ १ ॥ प्राणाय स्वाहासमाने निविष्टोमृतंजुहोमिचत्वारिं च ॥६७॥ श्रद्धायां प्राणो निविश्यामृतꣳहुतम् । प्राणमन्नेनाप्यायस्व । श्रद्धायामपाने निविश्यामृतꣳहुतम् । अपानमन्नेनाप्यायस्व । श्रद्धायां व्याने निविश्यामृतꣳहुतम् । व्यानमन्नेनाप्यायस्व । श्रद्धायामुदाने निविश्यामृतꣳहुतम् । उदानमन्नेनाप्यायस्व । श्रद्धायाꣳ समाने निविश्या-

मृतꣳहुतम् । समानमन्ने नाप्यायस्व । अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुःप्रीणाति विश्वमुक् । वाङ्मं आसन् । नसोः प्राणः । अक्ष्योश्चक्षुः । कर्णयोः श्रोत्रम् । बाहुवोर्बलम् । ऊरुवो रोजः । अरिष्टाविश्वान्यंगानि तनूः । तनुवामेसह नमस्ते अस्तु मा माहिꣳसीः । वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधये व बद्धान् । प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः । तेनान्नेनाप्यायस्व । नमो रुद्राय विष्णवे मृत्युर्मे पाहि । त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमभ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः । शिवेनमे सांतिष्ठ स्वस्योनेनमे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यार्धिमनुसंतिष्ठस्वोपते यज्ञ नम उपते नम उपते नमः ॥८०॥ सत्यं परं परꣳसत्यꣳसत्येन न सुवर्गाल्लोकाच्च्यवंते कदाचन सतामꣳहि सत्यं तस्मात्सत्ये रमंते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुरांधर्षं तस्मात्तपसि रमंते दम इति नियंते ब्रह्मचारिणस्तस्माद्दमे रमंते शम इत्यरण्ये मुनयस्तस्माच्छमे रमंते दानमिति सर्वाणि भूतानि प्रशꣳसंति दानान्नाति दुश्चरंतस्माद्दाने रमंते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नाति दुष्करं तस्माद्धर्मे रमंते प्रजन इति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायंते तस्माद्भूयिष्ठाः प्रजननेरमंतेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रेरमंते यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमंते मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमंते न्यास इति ब्रह्मा ब्रह्मा हि परः परोहि ब्रह्मातानिवाएतान्यवराणिपराꣳसि न्यास एवात्यरेचयच्च एवंवेदेत्युपनिषत् ॥ प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं

पितरमुपससार किं भगवंतः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायु रावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति तपसा देवा देवतामग्रआयन्तपसर्षयः संवव्रन्वविन्दन्तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति दमेन दांताः किल्बिषमवधुन्वंति दमेन ब्रह्मचारिणः सुवरगच्छन दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति शमेन शांताः शिवमाचरन्ति शमेन नाकं मुनयोन्वविंदन्छमोभूतानांदुराधर्षच्छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवंति दानेनारातीरपानुदंत दानेनं द्विषंतो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो भवति तदेव तस्या अनृणं तस्मात्प्रजननं परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः पंथा गार्हपत्य ऋक् पृथिवी रथंतरमन्वाहार्यपचनं यजुरंतरिक्षं वामदेव्यमाहवनीयः सामं सुवर्गो लोको बृहत्तस्मादग्निन्परमं वदन्त्यग्निहोत्रꣳ सायं प्रातर्गृहाणां निष्कृतिस्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेनं द्विषंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः

कतमः स्वयंभुप्रजापतिः संवत्सर इति संवत्सरोऽसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मायाभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्यनौषधिवनस्पतयः प्रजायंत ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारः स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददन्त्सर्वाण्येतानि ददात्यन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानंदो ब्रह्मयोनिः स वा एष पुरुषः पंचधा पंचात्मा येन सर्वमिदं प्रोतं पृथिवी चांतरिक्षं च द्यौश्च दिशश्चावांतरदिशाश्च सर्वै सर्वमिदं जगत्ससभूतः स भव्यं जिज्ञास कुर्वृक्षतजा रयिष्ठाः श्रद्धा सत्यो महस्वांतपसो वरिष्ठा ज्ञात्वा तमेव मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वांतस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मंस्त्वमसि विश्वधृत्तेजोदास्त्वमस्यमिरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चंद्रमस उपयामगृहीतोसि ब्रह्मणे त्वा महसओमित्यात्मानं युंजीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥ तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्भ्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनः सायं च

नूतन पुस्तकें.



की. रु. आ.

आत्मसर्वस्व–आयुर्वेद महामहोपाध्याय रसायन शास्त्री पं० भगीरथ स्वामी आयुर्वेदाचार्यसंगृहीत. ३–०

नागरसर्वस्व–काम शास्त्रका अपूर्व ग्रन्थ. २–८

नाडीज्ञानतरङ्गिणी–अनुपानतरङ्गिणी-भा०टी० सहित १–३

पञ्चसायक–भाषाटीकासहित (कामशास्त्र). २–०

वीरचित्रावली–वीरोंकी अद्भुतवीरता चित्रों सहित. ५–०

शिवनाथसागर–अनुभूत औषधोंका परमोपयोगी वैद्यकग्रन्थ. ३–०

शिशुपालन–बालकोंके पालन पोषणकी विधि सचित्र. १–०

श्रीविचारसागर–साधु श्री निश्चलदासजीकृत. ८–०

श्रीविचारचन्द्रोदय–ब्रह्मनिष्ठ पं० श्री [illegible] २–०

यूनान-रूम-युद्ध–(सन् १८२७ ई.) पहली लडी. २–८

सिद्धान्तकौमुदी–भाषाटीकासहित. १२–०

साहित्यदर्पण–संस्कृतटीकासहित. ७–०

(बडा सूचिपत्र अलग है, मँगाकर देखो.)

पुस्तकें मिलनेका ठिकाना–


गङ्गाविष्णु श्रीकृष्णदास,

मालिक–"लक्ष्मीवेङ्कटेश्वर" स्टीम् प्रेस-कल्याण–बम्बई.

CAD' CH
1 Y
21383
6-11-57

तानि सर्वाणि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबंधा ये संवत्सराश्च परिवत्सराश्च तेहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रꣳसत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चंद्रमसः सायुज्यꣳ सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम् ॥ ८० ॥ सह नाववतु। सहनौभुनक्तु० ॐशांतिःशांतिःशांतिः। हरिः ॐ। श्रीकृष्णार्पणमस्तु ॥

इति तैत्तिरीय-आरणोपनिषत्समाप्ता।



पुस्तक मिलनेका ठिकाना—

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्-प्रेस,
कल्याण—बम्बई.

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम-प्रेस,
खेतवाडी—बम्बई.

LIBRARY
ACADEMY Of SANSKRIT RESEARCH
MELKOTE-571 431

ACADEMY Of SANSKRIT RESEARCH
MELKOTE LIBRARY
Acc No 21382
Date 6-11-93